॥ श्रीः ॥
चौखम्बा सुरभारती ग्रन्थमाला
599

# महापरिव्राजकः

## गद्यकाव्यरूपेण श्रीशङ्कराचार्याणाम्
## जीवनं सिद्धान्तश्च


लेखकः
**परम पूज्य स्वामी परमानन्द भारती जी**
संस्कृतानुवादः
**डा. सुदर्शनचिळुणकरः**


Maha Parivrajaka


**चौखम्बा सुरभारती प्रकाशन**
**वाराणसी**

© **सर्वाधिकार सुरक्षित ।** इस प्रकाशन के किसी भी अंश का किसी भी रूप में पुनर्मुद्रण या किसी भी विधि (जैसे-इलेक्ट्रोनिक, यांत्रिक, फोटो-प्रतिलिपि, रिकॉर्डिंग या कोई अन्य विधि) से प्रयोग या किसी ऐसे यंत्र में भंडारण, जिससे इसे पुनः प्राप्त किया जा सकता हो, प्रकाशक की पूर्वलिखित अनुमति के बिना नहीं किया जा सकता है।

**महापरिव्राजकः**

ISBN : 978-93-85005-43-5

प्रकाशक
**चौखम्बा सुरभारती प्रकाशन**
(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
के. 37/117 गोपालमन्दिर लेन
पो. बा. नं. 1129, वाराणसी 221001
दूरभाष : 2335263
URL : www.exoticindia.com
email : csp_naveen@yahoo.co.in

**© सर्वाधिकार प्रकाशकाधीन**
प्रथम संस्करण 2016
₹ 100

वितरक
**चौखम्बा पब्लिशिंग हाउस**
4697/2, भू-तल (ग्राउण्ड फ्लोर)
गली नं. 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002
दूरभाष : 23286537
Email : chaukhambapublishinghouse@gmail.com

•

अन्य प्राप्तिस्थान
**चौखम्बा विद्याभवन**
चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पो. बा. नं. 1069, वाराणसी 221001

•

**चौखम्बा संस्कृत प्रतिष्ठान**
38 यू. ए. बंगलो रोड, जवाहर नगर
पो. बा. नं. 2113, दिल्ली 110007

**मुद्रक**
डीलक्स ऑफसेट प्रिंटर्स, दिल्ली

Maha Parivrajaka

# महापरिव्राजकः

।।श्रीगुरुभ्यो नमः।।

## प्राक्कथनम्

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः।। (विष्णुपुराणम्)

गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषास्सुरत्वात्।।

दुर्लभं भारते जन्म पुरुषस्य च वा पशोः।
विहङ्गस्य च वा जन्तोः वृक्षपाषाणयोरपि।।

अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने
यतो हि कर्मभूरेषा यतोऽन्या भोगभूमयः।।

अत्र जन्म सहस्राणां सहस्रैरपि सत्तम।
कदाचिल्लभते जन्तुर्मानुषं पुण्यसञ्चयात्।। (महाभारतम्)

देशः पृथ्वी तस्यां हिमवत् समुद्रान्तरम् उदीच्यात्।
योजनसहस्रपरिमाणं तिर्यक् चक्रवर्तिक्षेत्रम्।। (कौटिल्यः)

इत्यादीनि शतशः वाक्यानि, आसेतु आहिमाचलं व्याप्तं भारतम् अनादिकालात् एकं राष्ट्रमस्तीति, अत्रत्यजनानां राष्ट्रप्रेम च स्पष्टयन्ति। केचन आधुनिकाः इदं वचनं नाङ्गीकुर्वन्ति। ‘अत्रत्यानां राज्ञां सर्वदा कलहशीलत्वमेव इतिहासे पश्यामः। इदम् एकं राष्ट्रं कथं भवेत्?’ इति वदन्ति ते। एवं वदद्भिः अस्माभिः परम्परायां राष्ट्रस्य राज्यस्य च मध्ये विद्यमानः भेदः न ज्ञायते। राज्यविस्तरणस्य अभिलाषः राज्ञां स्वभावः। सः न भवति चेत् ते राजानः एव न। ‘असन्तुष्टो द्विजो नष्टः सन्तुष्टो हि महीपतिः’ असन्तुष्टः ब्राह्मणः, सन्तुष्टः राजा वा शीघ्रं विनष्टः भवति। विभिन्नस्थलेषु विभिन्नानि राज्यानि भवन्ति चेदपि, राजानः परस्परं स्पर्धन्ते चेदपि, युद्धानि प्रचलन्ति चेदपि हिमालयात् समुद्रपर्यन्तं विद्यमानं भारतम् एकं राष्ट्रमस्तीति अस्माकं राष्ट्रस्य वैशिष्ट्यम्। ‘साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठीं राज्यं

महाराज्यमाधिपत्यं पृथिव्यै समुद्रपर्यन्ताया एकराट्' इति वेदघोषः। 'वयं राष्ट्रे जागृयाम पुरोहिताः'-(अस्य एकत्वस्य रक्षणार्थं) पुरोहितैः अस्माभिः जागरूकैः भाव्यम् इति पुरोहितेभ्यः वेदस्य हितवचनम्। 'तथा चेत् भारतम् एकं राष्ट्रम् इति कस्मिन् अर्थे?' इति चेत् चिन्तनानि, जीवनध्येयानि च अस्य देशस्य सर्वेषु अपि जनेषु समानानि एव सन्ति। मोक्षेच्छा, मोक्षान्तरायरहितजीवननिर्वहणप्रयत्नः च सर्वेषु समानः। एतेषां ध्येयानां, चिन्तनानां च कारणेन एव देशे सर्वत्र विद्यमानेषु तीर्थक्षेत्रेषु सर्वे यात्राम् आचरन्ति। देशस्य सर्वासु नदीषु स्नानं कृत्वा पापविमुक्ताः भवितुम् इच्छन्ति। कुम्भमेला सर्वान् कर्षति। अस्याः जीवनशैल्याः वेदाः, पुराणानि, रामायणम्, महाभारतम्, इतिहासाः, सम्प्रदायप्रवर्तकाः महान्तः ऋषयश्च कारणम्। शास्त्रं न केवलं सामान्येभ्यः, अपि तु पिस्पर्धिषुभ्यः राजभ्यः च मार्गदर्शनं करोति; कलहे अपि धर्मं वदति ! राज्ञां राज्याभिलाषस्य स्वभावम् उपयुज्य राजनैतिकव्यवहारेषु देशस्य एकत्वं रक्षितुम् एकच्छत्राधिपत्यस्य अश्वमेधयागानां च कल्पनां शास्त्रं तेषां पुरतः स्थापयति। इदं राष्ट्रैकत्वं, राष्ट्रभक्तिः च अधुनापि अस्ति। इतः २५०० वर्षेभ्यः पूर्वं २५ शताब्दीनां निरन्तरसंघर्षस्य अन्ते देशः यदा स्वतन्त्रः अभवत् तदा ६०० राजानः स्वीयराज्यानि केन्द्रं प्रति अर्पितवन्तः; एतादृशं विस्मयकरं कार्यं प्रपञ्चस्य इतिहासे एव न प्रवृत्तम्। अपि च सर्वकारः 'यः कर्षणं करोति तस्मै एव भूमिः' इति यदा उदघोषयत् तदा भूस्वामिनः स्वीयां भूमिं सर्वकाराय अर्पयन्ति; एतादृशं कार्यं प्रपञ्चे कुत्रापि न प्रवर्तते। अन्येषु देशेषु एवं भवेत् चेत् रक्तस्य प्रवाहः एव भवेत् । अतः इदम् एकमेव राष्ट्रमासीत्, राष्ट्रमस्ति, अग्रे अपि एकमेव राष्ट्रं तिष्ठति। अस्य देशस्य अस्य धर्मस्य च स्वरूपं ज्ञातुमिच्छुकाः आधुनिकाः व्युत्पन्नचित्ताः यावत्पर्यन्तं स्वेषामुपरि जातात् पाश्चात्यसंस्कृतिप्रभावात् मुक्ताः न भवन्ति तावत्पर्यन्तं तेषाम् एतस्य अवगमनं न शक्यते।

सम्प्रदायप्रवर्तकैः ऋषिभिः आरब्धा इयम् अत्युत्कृष्टा व्यवस्था अपि कालक्रमेण शिथिला भवति इत्यपि शास्त्रं सूचयति। चतुर्षु पादेषु अपि कृतयुगे दृढतया स्थितः धर्मः उत्तरोत्तरं युगेषु एकैकं पादं परित्यज्य अन्ते कलियुगे केवलम् एकेनैव पादेन तिष्ठति। कलौ प्रविशति सत्येव अर्जुनस्य पौत्रः अभिमन्योः पुत्रश्च श्रेष्ठवंशसम्भूतः परीक्षित्, स्वयं चक्रवर्ती इति विस्मृत्य चटुलः बालकः इव व्यवहरति। तेन पृष्टस्य प्रश्नस्य उत्तरं न दत्तवान् इति असमाधानेन ध्यानस्थस्य शमीकस्य गले मृतसर्पमालां स्थापयति। एवं स्थितौ, कलियुगस्य प्रभावः सामान्यजनानाम् उपरि कियान् स्यात् !



तेषां वेदेषु श्रद्धा क्रमेण न्यूना भवति; स्वबुद्धौ अल्पवादः अधिकः भवति। जनानां शान्त्याः कारणीभूताः वर्णाश्रमधर्माः शिथिलाः भवन्ति। तेषु केचन बुद्धिमन्तः प्रत्यक्षानुमानप्रमाणयोः एव विश्वासं निधाय जीवनसम्बद्धान् सिद्धान्तान् प्रतिपादयन्ति। आरम्भे साङ्ख्यादयः इव वेदान् पूर्णतया अत्यक्त्वा इदं साहसम् आचरन्ति; अनन्तरं जैनाः इव वेदान् परित्यज्य आचरन्ति; इतोऽप्यनन्तरं वेदविरुद्धे कल्पनासाम्राज्ये भूत्वा, सुगतः इव स्वतन्त्रान् सिद्धान्तान् प्रतिपादयन्ति। वेदेभ्यः दूरं गताः स्वेषां सिद्धान्तानां ज्येष्ठत्वं सम्पादयितुं समूहान् रचयन्ति। ज्येष्ठत्वं समूहस्य सदस्यानां सङ्ख्याम् आश्रित्य तिष्ठति ! अतः क्रौर्येण वञ्चनया च स्वेषां समूहान् प्रवर्धयितुम् उद्युक्ताः भवन्ति। समाजे क्षोभः सञ्जायते। अधुना २५०० वर्षेभ्यः भारते जातम् इदमेव।

वेदविरुद्धमतियुक्तात् बुद्धात् पतनस्य वेगः तीव्रः सञ्जातः इति अस्मासु वदत्सु सत्स्वपि, बुद्धः एव वेदविरोधी आसीत् इत्येतस्य प्रमाणेषु केचन आधुनिकाः न विश्वसन्ति। बुद्धस्य अनन्तरं प्रायः शताब्दीत्रयं यावत् बौद्धमतं मगधे सीमितम् आसीत्। अनन्तरं तस्य अनुयायिनां सङ्ख्यायां प्रवर्धमानायां सत्यां बौद्धविद्वांसः ग्रन्थान् रचितवन्तः। तेषु विभिन्नाः अभिप्रायाः सन्ति। किन्तु सर्वेऽपि स्वैः कथ्यमाना एव बुद्धवाणी इति वदन्ति। तत् किमपि वा भवतु, वैदिकसम्प्रदायविरोधः इति तेषु सर्वेषु विद्यमानं समानं लक्षणम्। अधुनातनसंशोधनेषु बुद्धः वेदविरोधी न आसीत्, अनुयायिनः तस्य उपदेशं विपरीततया गृहीतवन्तः इत्यादीनि वचनानि श्रूयन्ते। एतेषां संशोधनानां विचारे अपि बौद्धविद्वत्सु परस्परं विरुद्धाः अभिप्रायाः सन्ति। अतः आद्यन्तरहितेषु एतेषु वादेषु प्रवेशेन लाभः नास्ति। सर्वे यथा अङ्गीकुर्युः तथा बुद्धः वेदविरोधी नासीत् इत्येतत् वचनं कालक्रमेण सिद्धं चेत् अस्माकं सन्तोषः एव। किन्तु बुद्धस्य नाम वदन्तः २००० वर्षेभ्यः लिखिताः बौद्धग्रन्थाः देशं दुर्दशां प्रति नीतवन्तः इति इतिहासेन निस्संशयं निर्णीतम्। बौद्धमतावलम्बिनः राजानः युद्धमेव परित्यज्य नपुंसकाः सञ्जाताः। संघस्य कृते सहकारः दातव्यः इति बौद्धादेशम् आश्रित्य राजानः जनान् बलात्कारेण बौद्धमतं प्रति आनीतवन्तः। वैदिकसम्प्रदाय-नाशेच्छवः बौद्धाः देशम् आक्रान्तवतः प्रत्येकं शत्रोः अपि साहाय्यमाचरितवन्तः। अहिंसाकल्पनाम् अतिरेकतां प्रति नीत्वा राजानः मांसाहारिणः अस्पृश्यान् कृतवन्तः। एवं देशस्य नाशनं कृत्वा, अन्ते स्वैः उपकृतैः हूणैः, यवनशत्रुभिश्च स्वयमपि नष्टाः। बौद्धमतखण्डनस्य अन्ते बुद्धस्य विचारे शङ्कराचार्याणां कटुभाषणे इदमेव कारणम्।

बौद्धानां दुर्व्यवहारः यस्मिन् समये सोढुम् अशक्यः आसीत्, तस्मिन् समये ब्राह्मणः पुष्यमित्रः आपद्धर्मम् अवलम्ब्य, सम्राट् भूत्वा, शत्रून् देशात् दूरीकृत्य देशद्रोहिणां बौद्धानां नाशनं कृत्वा एकच्छत्राधिपत्यं स्थापितवान्। योगसूत्रकारः पतञ्जलिः तस्य द्वारा अश्वमेधयागं कारितवान्।

इतः प्रायः १३शताब्दीतः पूर्वम् इत्युक्ते शङ्कराचार्याणां काले बौद्धमतं केषुचित् पण्डितम्मन्येषु, केषुचित् मुग्धेषु च सीमितम् आसीत्। किन्तु बुद्धात् आरब्धे दुस्सम्प्रदायस्य मार्गे व्यक्तिनिष्ठसिद्धान्ताः, तेषां तेषां मतानि, अन्धश्रद्धाः च समाजे उद्भूताः। वेदाध्ययनं कुण्ठितम् अभवत्। वर्णाश्रमधर्माः मार्गभ्रष्टाः अभवन्। तेषां पुनरुज्जीवनार्थं जनिं प्राप्तवन्तः शङ्कराचार्याः। एवम् उक्ते सत्येव अस्माकं देशस्य आधुनिकाः बुद्धिजीविनः महान्तं वादम् उत्थापयन्ति; तत् नूतनं न, बुद्धादेव आरब्धम्। 'एतावत्पर्यन्तं जनैः विश्वसिता वर्णव्यवस्थाकल्पना न समीचीना। अतः तस्याः रक्षणम् उत्तमकार्यं न। वर्णधर्मो नाम कः ? ब्राह्मणक्षत्रियवैश्यशूद्रकुलेषु जनिं प्राप्तः तत्तद्वर्णजः। शास्त्रं तत्तद्वर्णस्य एकं विशिष्टं शास्त्रीयं कर्म, एकं जीवनविधानं च विधत्ते। तदनुसारं जनानाम् आचरणं वर्णधर्मः इति कथनं न युज्यते। यतो हि, एकैकस्यापि वर्णस्य शास्त्रे यानि गुणलक्षणानि उक्तानि तानि केवलं तत्तत्कुलेषु न दृश्यन्ते; अन्यकुलेषु जनिं प्राप्तवत्सु अपि दृश्यन्ते। अतः तेषां तेषां गुणानुसारं वर्णः, वर्णधर्माश्च वक्तव्याः, न तु जन्मना' इति तेषां वादः। अतः अयं वादः शान्ततया विमृष्टव्यः।

विमर्शात् पूर्वं एतावता अस्मिन् वादे किं किम् अङ्गीकृतम् इति, निर्णयार्थम् अवशिष्टः विचारः कः इति च विभाजनं करणीयम्। समाजस्य व्यवस्थितजीवनार्थं चत्वारः वर्णाः अपेक्ष्यन्ते इति वर्णव्यवस्था अङ्गीकृता। तेषां गुणानाम् आधारेण निर्धारणं करणीयम् इत्यपि अङ्गीकृतम्। पुनश्च, अमुकगुणवताम् अयं धर्मः इति यत् शास्त्रं वदति, तत् समीचीनमेव अस्तीति एभिः अङ्गीकृतः एव अंशः। अनङ्गीकृतः चर्चार्थं विद्यमानश्च प्रश्नः केवलम् अयमेव, वर्णः जन्मनः अनुगुणं वक्तव्यः वा? उत अधुना दृश्यमानानां गुणानाम् अनुसारं वक्तव्यः? इति। अस्य प्रश्नस्य तेषाम् उत्तरम् : जन्मनः अनुगुणं न वक्तव्यः, अधुना दृश्यमानानां गुणानाम् अनुसारम् एव वक्तव्यः – Varna is to be determined not by birth, but by worth i.e., conduct character – आचरणं तथा चारित्र्यम् ।[1]

1.Survey of Buddhism by Sangharakshita



इदम् उत्तरं कियत् समीचीनम्? गुणाः इत्युक्ते सत्त्वरजस्तमोगुणाः। इमे त्रयः अपि सर्वेष्वपि सन्तीति प्रत्यक्षम्। कथमिति चेत्, केचन कदाचित् सात्त्विकरूपेण, कदाचित् राजसरूपेण, कदाचित् तामसरूपेण च व्यवहरन्ति, इत्युक्ते यः कोऽपि गुणः सन्दर्भम् अनुसृत्य प्रकटः भवति; प्रकटः न भवति चेत् सः गुणः अस्ति इत्येव निर्णीतं न भवति। तावदेव न। एकः एव गुणः एकैकस्मिन् एकैकया रीत्या प्रकटः भवति। तमोगुणः एकम् आलस्ययुक्तं कृत्वा तूष्णीम् उपवेशयति; अन्यस्य निद्रां जनयति; अपरस्य सुरापानं कारयति। रजोगुणवशात् कोपः यदा भवति तदा एकः केवलं मुखं कुटिलीकरोति, अन्यः ताडयति, अपरः वधम् एव करोति। सत्त्वगुणस्य प्राधान्ये एकः शिशुं प्रीत्या आलिङ्गति, अन्यः सद्ग्रन्थं पठति, अपरः ध्यानस्थः भवति। एतेषां भेदानां किं कारणम्? तस्मिन् विद्यमानयोः अन्ययोः द्वयोः गुणयोः सान्द्रता। अतः त्रयः अपि गुणाः सर्वेषु भवन्ति चेदपि विभिन्नरीत्या प्रचोदयन्ति। तावदेव न, एकस्मिन् एव एकैकस्मिन् क्षणे विभिन्नरीत्या प्रचोदयन्ति। एकैकस्मिन्नपि विद्यमानानां गुणानां प्रमाणं किम्? परिवर्तनशीलं प्रमाणं कियता वेगेन कस्यां दिशि परिवर्तयति? इति एकं दृष्ट्वा प्रत्यक्षतया निर्धारणं कर्तुं शक्यमिति चेत्, तदा तस्य धर्मः कः इत्यपि निर्धारणं कर्तुं शक्यम्। एवं निर्धारणं मानवेन साध्यं किम्? कोऽपि वैद्यः नाडीपरीक्षां कृत्वा तस्य प्रमाणपत्रं दद्यात् वा? एतादृशेषु विषयेषु अन्येन कृतं निर्णयं को वा स्वीकरोति? कोऽपि निर्धारणं करोति इति चेत्, तस्य निर्धारणं समीचीनम् इत्यस्य प्रमाणं किम्? 'स्वस्य स्वयमेव निर्धारणं कर्तुं शक्यम्' इति चेत्, तदा समाजे सङ्घर्षः न भवेत्; यतो हि वर्णधर्मस्य सद्भावः एव समाजस्य शान्त्यर्थम्। अतः अधुना दृश्यमानानां गुणानाम् अनुसारम् अन्येन केनापि अथवा स्वयमेव निर्धारणं करणीयमिति मत्तोन्मत्तप्रलापः एव।

तर्हि व्यक्तीनां गुणनिर्धारणं केन? किमर्थम्? कथम्? करणीयम् इति प्रश्नाः। केन करणीयम्? भगवता करणीयम्। यतो हि, यत् अन्यः कर्तुम् एव न शक्नोति तस्य कर्ता एव भगवान्। इदं जगत् अथवा जीवान् वा अन्यः कोऽपि स्रष्टुं न शक्नोति। सर्वज्ञः सर्वशक्तश्च भगवान् एव सृजेत्। अहं मत्तः इव भ्रमित्वा कर्म कृत्वा तस्य भोक्ता; सः किमपि कर्म अकृत्वा कमपि भोगम् अभुक्त्वा, सर्वदा मम गुणकर्मणाम् एव द्रष्टा। अतः निर्धारणं कर्तुं समर्थः सर्वहृदयसन्निविष्टः सः एकः एव ! अनन्तरं, गुणानां निर्धारणं किमर्थं करणीयम्? अहं गुणाधीनः सन् तप्ततैले पतितः पर्पटः इव वित्रस्यामि। सः अस्मात् तापात् माम् उद्धृत्य मोक्षनामके गुणातीते,

MahaParivrajaka

शाश्वते, आत्यन्तिके च आनन्दे स्थापयेत्। मम मोक्षम् अहम् अङ्गीकृत्य तं प्राप्तुम् अधिकारसम्पादनार्थम् अहमेव कर्म कुर्याम्। मया करणीयं कर्म मम अद्यतनगुणान् अवलम्बते, तान् नियन्त्रयति च। मम गुणाः के इत्यपि अहं न जानामि, केन कर्मणा अहं मम गुणान् तरितुं शक्नोमि इत्यपि न जानामि। अतः तस्य उभयस्यापि निर्णयं भगवान् एव कुर्यात्। पुनश्च, मम गुणान् सः कथं निर्णयति? अस्य उत्तरं सः एव उक्तवान् : गुणानां कर्मणां च अन्योन्याश्रयरूपः अविनाभावसम्बन्धः अस्ति; इत्युक्ते, गुणयुक्तः कर्माणि करोति, कृतं कर्म गुणानां प्रमाणस्य निर्णयं करोति। एकस्य प्रभावः अन्यस्य उपरि प्रतिक्षणं जायते। अतः गुणाः अत्यन्तं जटिलाः। सर्वदापि मम गुणानां कर्मणां च द्रष्टा भगवान् एव मरणकाले मम गुणान् निर्णीय, अग्रिमजन्मनि ययोः पित्रोः जन्म प्राप्नोमि चेत् अग्रे गन्तुं शक्नोमि, तयोः अपत्यरूपेण मां जनयति। अपि च तस्मिन् कुले जन्म प्राप्तवतः मम तदनुगुणं कर्मविधानं करोति। अहं तत् अनुसरामि चेत् अग्रे गच्छामि, तिरस्करोमि चेत् पृष्ठतः गच्छामि; इत्युक्ते, 'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः' इत्यत्र गुणाः स्वभावप्रभवाः, इत्युक्ते गतजन्मसु कृतेभ्यः संस्कारेभ्यः जन्म प्राप्तवन्तः, अपि च कर्म इत्युक्ते अस्य जन्मनः कृते शास्त्रेण विहितम्। बुद्धः भगवन्तं त्यक्तवान् इत्यतः विवेचनार्थम् आवश्यकं मार्गं सः पिहितवान् आसीत्।

एतावत् वर्णधर्माणां विचारे चिन्तनं जातम्। इतःपरम्, आश्रमधर्माः इत्युक्ते किम्? विवेकवतः आजीवनं श्रमः एव विहितः – कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः, किमर्थं श्रमः? मोक्षप्राप्त्यर्थम्। मोक्षे संसारः नास्ति, तथैव गुणानां प्रभाववशात् मनुष्यः संसारं त्यक्तुं न शक्नोति। संसारात् झटिति मोक्षं प्रति गमनम् अपि असाध्यम्। संसारे भूत्वैव मोक्षदिशि अग्रे सर्तव्यम्। तदर्थं शास्त्रे चत्वारः स्तराः विहिताः; ते एव चत्वारः आश्रमाः। आदिमः ब्रह्मचर्याश्रमः; मोक्षार्थं क्रियमाणम् अध्ययनमेव अत्रत्यः श्रमः। अस्मिन् अध्ययने न्यूनातिन्यूनं मोक्षस्य परिचयः वा भवेत्। द्वितीयः गृहस्थाश्रमः; मोक्षार्थं मनसः सज्जीकरणार्थं क्रियमाणं कर्म एव अत्रत्यः श्रमः। तृतीयः वानप्रस्थाश्रमः; गुणानां बलेन प्रेरितः सन् गृहस्थदशायां संसारसुखं कश्चित् अनुभवति चेदपि, तदनन्तरं तेन विवेकेन वनप्रदेशं गत्वा मोक्षार्थं कठिनतपः आचर्यते यत् सः अत्रत्यः श्रमः। अयं पक्वः चेत् सम्पूर्णवैराग्य-नामकेन श्रमेण सर्वदा भगवतः चिन्तने विद्यमानत्वम् अन्तिमः संन्यासाश्रमः। एतेषाम् आश्रमाणां द्वारा क्रमशः सत्कर्मभिः गुणान् परिवर्त्य, अन्ते गुणातीतं मोक्षं



प्रापयितुं विद्यमानाः इमे वर्णाश्रमधर्माः। अतः 'मयि अन्यस्य वर्णस्य गुणाः सन्ति। तस्य वर्णस्य कृते उक्तं कर्म अहम् इतोऽपि समीचीनतया कर्तुं शक्नोमि, तदेव करोमि' इति कथनम् असाधु। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः – स्वधर्मं समीचीनतया अनुष्ठातुं न शक्यते चेदपि, तत्करणप्रयत्नः एव श्रेयः करोति; परधर्माचरणेन मम नष्टम्; इत्युक्ते मम कर्मणि शास्त्रविधेः अनुसरणम् एव श्रेयः।

अत्र एकः प्रमुखः अंशः; शास्त्रोक्तजीवनविधाने धनसङ्ग्रहणस्य अवसरः वैश्यस्य कृते। अस्मिन् पक्षपातबुद्धिं दृष्ट्वा अस्य वादस्य कलहम् उत्थापयन्ति चेत् तस्य कारणं नास्ति; यतो हि, अनिवार्यप्रसङ्गे जीवननिर्वहणोपायरूपेण अन्यस्य वर्णस्य कर्म अवलम्बितुं शास्त्रम् अवसरं कल्पयति। तदेव समीचीनमिति ५-६ सन्ततिपर्यन्तं यदि तद्वदेव अनुवर्तते तर्हि ते अन्यवर्णजाः एव भवन्ति। निर्बन्धः केवलम् आमुष्मिकस्य कृते उक्तानां शास्त्रीयकर्मविधीनाम् एव।

वर्णाश्रमधर्माचरणेन एव समाजे शान्तिः समृद्धिश्च इति कथने किं प्रमाणम्? इति चेत्, पश्यन्तु : अस्माकं देशः २५००वर्षेभ्यः सतताक्रमणानां ग्रासः जातोऽस्ति। भारते समृद्धिः यदि न स्यात् पर्षियन्नाः, ग्रीकाः, यवनाः, हूणाः, शकाः, अरब्बाः, आङ्ग्लाः, फ्रेञ्चाः, पोर्चुगीसाः, डच्चाः अथवा इतोऽपि केऽपि भवेयुः, भारतस्य उपरि आक्रमणं न कुर्युः । इयं कीर्तिः अन्यस्य कस्य देशस्य अस्ति? अपि च अस्य समाजस्य अन्तःसत्त्वं पश्यन्तु : यवनाः ९-१० शताब्दीः यावत् तथा आङ्ग्लाः शताब्दीद्वयं यावत् क्रौर्यचौर्यवञ्चनाभिः एनं समाजं नाशयितुं बहुधा प्रयत्नं कृतवन्तः चेदपि इदं राष्ट्रं न मृतं, जीवति। तावदेव न, उत्थाय तिष्ठति। इयं कीर्तिः अन्यस्य कस्य देशस्य अस्ति? शत्रवः सर्वे शिलीन्ध्राणि इव उद्भूताः, अहङ्कारेण मत्ताः, मृताः अपि। तेषां सर्वेषाम् आयुः १-२ शताब्द्यौ यावत्; भारतं जीवदस्ति, तत् चिरञ्जीवि। एवं स्पष्टाः विचाराः अस्माकं केषाञ्चन बुद्धिमतां न दृश्यन्ते। एवम् आन्ध्येन शत्रुभिः सह मिलित्वा ते अपि वर्णाश्रमधर्मं नाशयितुं प्रयत्नं कुर्वन्ति। किन्तु धर्मनिष्ठैः इदं दृष्ट्वा भयम् अनुभोक्तव्यम् इति नास्ति। एतावत्पर्यन्तं कियन्तः हिरण्याक्षाः, हिरण्यकशिपवः, रावणकंसादयः, यवनाः, आङ्ग्लाः च अस्य आघातं कृतवन्तः चेदपि बृहच्छिलां प्रति घट्टितः मृत्पिण्डः इव ते सर्वे विनष्टाः। इदं दृष्ट्वापि अस्य धर्मस्य अन्तःसत्त्वं ज्ञातुम् असमर्थैः अविवेकिभिः मनःक्लेशः अनुभूयेत चेदपि धर्मस्य हानिः न साध्या।

सत्यमेव, कालः यां कामपि व्यवस्थां शिथिलीकरोति, व्यवस्थायाम् अन्तर्भूताः धर्मविधीनां पालने शिथिलाः भवन्ति। अयं प्रकृतिनियमः। एवं व्यवस्थायां दोषे जाते सति दोषनिवारणार्थं प्रयत्नः करणीयः, न तु अनादिकालात् आगतायाः व्यवस्थायाः नाशने। शिरोवेदनायाः परिहारः शिरश्छेदः न। वर्णाः अस्य समाजपुरुषस्य अङ्गानि, वर्णधर्मः समाजस्य रक्तगुणः। क्रैस्तरूपेण यवनरूपेण वा परिवृत्ताः अपि शतशः वर्षाणाम् अनन्तरमपि तं केनापि प्रकारेण रक्षन्तः सन्ति। बालिद्वीपस्थाः हिन्दवः वर्णव्यवस्थायाम् अन्तर्भूताः इति स्वयम् अद्यापि गर्वेण वदन्ति। अतः बुद्धिमन्तः समाजस्य हितचिन्तकाश्च अस्याः व्यवस्थायाः परिशुद्धये प्रयत्नं कृत्वा सा कार्यक्षमा यथा स्यात् तथा कुर्वन्ति चेत् सर्वेषां श्रेयः। अस्य एकं दृष्टान्तं पश्यन्तुः जपानदेशे विद्युत्तन्त्रीणां स्तम्भेषु पक्षिणः नीडान् रचयन्ति स्म। ते भूयो भूयः तन्त्रीद्वयमपि स्पृष्ट्वा स्वयं मरणं प्राप्य विद्युत्प्रवाहमपि स्थगयन्ति स्म। तत्सम्बद्धाः अधिकारिणः तान् पक्षिणः कञ्चित्कालं यावत् मारयन्तः आगताः। अथापि ते नीडरचनां न स्थगितवन्तः, विद्युत्प्रवाहे अन्तरायोऽपि न अपास्तः। ते इमां समस्यां विज्ञानिनां पुरस्तात् संस्थाप्य परिहारं सूचयितुम् उक्तवन्तः। सर्वाभिः दृष्टिभिः समस्यायाः अध्ययनं कृत्वा विज्ञानिनः, विद्युत्स्तम्भयुते मार्गे सर्वत्र पक्षिणां कृते प्रत्येकरूपेण नीडं रचयितुम् आनुकूल्यं कल्पयितुं सूचितवन्तः। सूचना कार्यगता अभवत्, समस्या परिहृता, पक्षिणः च रक्षिताः। अस्माकं समाजस्य सर्वे बुद्धिजीविनः एवं रूपेण स्वीयबुद्धेः सद्विनियोगं कृत्वा वर्णव्यवस्थां सात्त्विकरूपेण, निष्पक्षतया, कूलङ्कषरूपेण च विमृश्य सर्वेषां शान्तौ प्रयत्नशीलाः भवेयुः इति मम हार्दा विज्ञापना।

केचन सुसंस्कृताः 'वर्णपद्धत्या उच्चनीचभावनाः आगताः, इदमेव अस्मदीयानाम् अन्यमतानि प्रति परिवर्तने कारणमस्ति' इति वदन्ति। किन्तु इतिहासस्य कथनम् अन्यदेव : वर्णव्यवस्थायाः विरोधि बौद्धमतं यवनानाम् आक्रमणात् पूर्वं सिन्धु-गान्धारवङ्गदेशेषु व्यापकरूपेण प्रसृतमासीत्। यवनानाम् आक्रमणानन्तरं तत्प्रदेशस्थाः बौद्धाः सर्वे यवनाः अभवन्; तौ अधुनातनौ पाकिस्तानबाङ्ग्लादेशौ अभवताम्। किन्तु यस्मिन् मगधे वैदिकराजभिः वर्णव्यवस्था रक्षिता आसीत् तत्र एतादृशं परिवर्तनं न अभवत्; मगधम् अधुनापि बिहारनाम्ना भारते एव अस्ति। त्रिपुराराज्ये हिन्दूधर्मस्य अवस्थितौ अपि दूरदृष्टियुतैः ब्राह्मणैः चातुर्येण कृतं वर्णधर्मस्य रक्षणमेव कारणम्। तावदेव न। शङ्कराचार्येभ्यः पूर्वं बलात्कारेण वञ्चनया च बौद्धमतं प्रति



परिवृत्ताः चण्डालादयः, तत्रत्यया अस्पृश्यभावनया जुगुप्सिताः सन्तः वर्णपद्धतियुतं वैदिकधर्मं प्रत्यागताः। एतेन बौद्धमते उच्चनीचभावना आसीदिति, वैदिकधर्मे नासीदिति च एककालेनैव स्पष्टं भवति। पुनश्च इतिहासे सर्वत्र, अस्मदीयाः इस्लाममतं प्रति परिवृत्ताः केवलं क्रौर्येण, क्रैस्तमतं प्रति परिवृत्ताः केवलं वञ्चनया प्रलोभनैः च इति सर्वेषां विदितमेव। परिवर्तनानन्तरमपि तत्रत्याः अन्ये तान् नीचभावनया पश्यन्तः सन्ति इत्यपि सर्वविदितम्। अतः वैदिकव्यवस्थायाम् उच्चनीचभावनाः आसन् इति, ताः एव मतपरिवर्तने कारणानि अभवन् इति च आधाररहितानि वचनानि।

परिवर्तनस्य कारणं किमपि वा स्यात्, ते सर्वे स्वधर्मं प्रत्यागच्छेयुः। नवमशताब्द्याः आदिमे भागे सिन्धुदेशस्य देवलमहाभागः अमुम् आदेशं दत्तवान्। मेधातिथिः तस्य अनुवर्तनं कृतवान्। एतौ उभावपि शङ्करसमकालीनौ कनीयांसौ इत्यतः अस्मिन् कार्ये 'चण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम' इति उक्तवद्भ्यः शङ्कराचार्येभ्यः स्फूर्तिं प्राप्तवन्तौ इति चेत् नास्ति आश्चर्यम्। अधुना प्रमुखाः नैके संन्यासिनः एतत् कार्यम् अनुवर्तयन्तः सन्ति। समर्थरामदासस्य मार्गदर्शने शिवाजी-महाराजः, हक्कबुक्कयोः विषये विद्यारण्यश्च एतत्कार्यं कृतवन्तौ। अधुना आर्यसमाजः महता प्रमाणेन करोति। अधुना माध्यमानां द्वारा, सञ्चारसौविध्यानां च द्वारा वैदिकधर्मः सर्वत्र प्रसार्यमाणः अस्ति। ७०% अमेरिकादेशस्थाः अधुना स्वात्मानं हिन्दवः इति आह्वयन्ति इति वदन्ति; यतो हि हिन्दुदेवतासु, पुनर्जन्मनि, योगशास्त्रे च तेषां विश्वासः अस्ति। पश्चिमदेशेषु क्रैस्तमन्दिराणां द्वाराणि पिधीयमानानि सन्ति; अरबदेशेषु जायमानेभ्यः विप्लवेभ्यः यवनानां प्रत्येकतायाः समाप्तिः आरब्धा इति भासते। अस्माकं देशे एतादृशमार्गाणां बहवः जनाः स्वधर्मं प्रति आगन्तुम् उत्सुकाः सन्ति। सुप्तः तेषां स्वधर्माभिमानः अधुना जागरणं प्राप्नुवन् अस्ति।

शङ्कराचार्येभ्यः पूर्वम् अनन्तरं च या स्थितिः आसीत् तस्याः विश्लेषणार्थम् एतावत् पर्याप्तम्। इतः परं शङ्करस्य इतिहासं वक्तुम् उद्युक्तस्य अस्य उपन्यासस्य विषयः। अनादिकालात् आगते अस्माकं समाजस्य भव्येतिहासे संन्यासिनाम् उल्लेखः अतिविरलः। अतः शङ्करस्य काले एव केचन संन्यासाश्रमः श्रुत्युक्तः न इति, अधुनातनीषु कासुचित् स्मृतिषु दृश्यमानः नवीनः विचारः इति वादम् अकुर्वन्। इदं न समीचीनमिति शाङ्करभाष्ये स्पष्टीकृतम्। ये संन्यासिनः सर्वेषु कालेषु अपि आसन् ते जनानाम् अवधाने न आगच्छन्ति स्म। शास्त्रेण तेषां कृते विहिता

जीवनशैली एव अस्य कारणम्; ते कुतश्चित् भिक्षां प्रार्थ्य भुक्त्वा एकान्ते जीवेयुः। किन्तु धर्मग्लानौ सत्याम् आपद्धर्मम् अनुसृत्य ते स्वेषाम् एकान्तात् बहिरागत्य धर्मरक्षणार्थम् अद्भुतानि साहसकार्याणि अकुर्वन्। एतादृशानां दण्डिसंन्यासिनां साहसगाथाः शङ्करात् १२शताब्दीतः पूर्वम् अमुं देशम् आक्रान्तुम् आगतस्य अलेक्साण्डरस्य कालादेव सन्ति। इदमिदानीं पर्यन्तं दण्डिसंन्यासिनः तापसाः च इमां परम्पराम् अनुसृतवन्तः। मधुसूदनसरस्वती, शिवाजिमहाराजस्य मार्गदर्शकः स्वामी रामदासः, हक्कबुक्कयोः मार्गदर्शकः महासंन्यासी विद्यारण्यः, झान्सिलक्ष्मी-बाय्याः गुरुः गङ्गानाथः इत्येते सर्वे दृष्टान्ताः।

१८५७ तमस्य स्वातन्त्र्यसङ्ग्रामस्य मनोभूमिकां सज्जीकृतवन्तः प्रमुखतया तापसाः। मधुसूदनानां जीवने प्रवृत्तः प्रसङ्गः अयम् : तेषां समये अक्बरः राजा, बीरबल्लः च तस्य मन्त्री। राणा प्रतापसिंहः स्वधर्मार्थं सर्वस्वस्यापि अर्पणं कृत्वा गिरिशिखरेषु यदा भ्रमन् आसीत् तदा तस्य बन्धुना सता मया तस्य शत्रोः अक्बरस्य मन्त्रिरूपेण कार्यनिर्वहणं क्रियते इत्येतत् बीरबल्लस्य दुःखं जनयति स्म। तस्य शमनार्थं धर्मार्थं स्वात्मना किमपि कार्यं करणीयम् इति सः इच्छति स्म। तस्य एकः सुसमयः समापन्नः। यवनफकीराः अस्मदीयान् शतशः संन्यासिनः मारयन्तः सन्ति इति वार्ता तेन प्राप्ता। अयमेव समीचीनः अवसरः इति मत्वा, अक्बरः यदा स्वविषये प्रेमभावेन व्यवहरति तदा तादृशं समयं दृष्ट्वा, बीरबल्लः अस्याः समस्यायाः विचारे चर्चां कृतवान्। 'फकीराः परस्परं कलहं कुर्वन्ति चेत् अहं मध्ये न प्रविशामि' इत्यवदत् अक्बरः। झटिति बीरबल्लः अवदत् : 'इदं भवद्वचनम् अधिकारपत्ररूपेण दीयताम्।' सः दत्तवान्। बीरवल्लः तत् स्वीकृत्य बङ्गाले विद्यमानेभ्यः मधुसूदनेभ्यः प्रापय्य, 'गुरुवर्याः! उचितया रीत्या अस्य उपयोगं कुर्वन्तु' इत्यवदत्। ते तत् स्वीकृत्य राजस्थानस्य कस्यचन राणाख्यस्य सकाशं गताः। देशे महान्तः संन्यासिनः इति विख्याताः ते स्वस्य गृहमागताः इति दृष्टवतः तस्य महान् आनन्दः अभवत्। मधुसूदनाः तस्य सकाशे एकं दानं याचितवन्तः। 'किं दानरूपेण दद्याम्? दातुं यदि सामर्थ्यम् अस्ति तर्हि अवश्यं ददामि' इत्यवदत् राणा। ते एकं सैन्यभागं दानरूपेण याचितवन्तः। आश्चर्येण सः यदा तेषां निकटे विवरणम् अपृच्छत् तदा, तैरुक्तैः विवरणैः दानं कर्तुं तस्य भयमभवत्। तैः तस्मै दर्शितम् अक्बरस्य अधिकारपत्रं दृष्ट्वा भयनिवारणमभवत्। तैः इष्टं दानं प्राप्तम्। तेभ्यः सैनिकेभ्यः ते नागादीक्षां दत्त्वा



अवदन् : 'घातकेभ्यः फकीरेभ्यः अस्माकं संन्यासिनां रक्षणं भवतां कर्तव्यम्।' ते घातकान् फकीरान् खण्डशः कृतवन्तः। समस्या परिहृता। नागासम्प्रदायः शङ्करेण आरब्धः इति केचन वदन्ति; अस्मिन् विचारे मया न किमपि प्रमाणं प्राप्तम्।

केषुचित् शङ्करविजयेषु शङ्करः बौद्धानां वधं कारितवान् इति कल्पना अस्ति। तत् सर्वथा न समीचीनम्। यतो हि तस्य काले तस्मात् मरणं प्राप्तुं बौद्धाः एव नावशिष्टाः इति विस्पष्टम्। किन्तु श्रीशैले एकस्य, कर्णाटके एकस्य च वधः जातः। तौ बौद्धौ न, कापालिकौ। तदपि गुरुरक्षणार्थं शिष्याणां द्वारा अनिवार्यतया प्रवृत्तम्।

संन्यासिशङ्करस्य लीले द्वे एव; नर्मदाप्रवाहस्तम्भनम्, परकायप्रवेशः च। एतदुभयमपि महायोगसिद्धी, कल्पना न। किन्तु तेषां नाम इतिहासे स्थायिरूपेण विद्यते इत्यस्य कारणं तत् न; धर्मग्लानेः रक्षणार्थं तेषां पात्रस्य गभीरता विशालता च कारणम्। तस्य इतिहासलेखनावसरे ऐतिहासिकाधाराणाम् अभावः अस्तीति भयं सर्वेषु लेखकेषु भवति। तेषां जन्मस्थानं, वंशः, अष्टमे वर्षे गृहत्यागः, गोविन्दभगवत्पादेभ्यः संन्यासस्वीकारः, प्रस्थानत्रयस्य भाष्यरचना, पद्भ्यामेव त्रिवारं कृतः समग्रदेशसञ्चारः, ३२तमे वर्षे जीवनस्य समाप्तिः – इति अंशान् प्रायः सर्वे अङ्गीकृतवन्तः। किन्तु विविधेषु शङ्करविजयेषु विद्यमानानाम् अन्येषां विवरणानाम् ऐतिहासिकाधारः नास्तीति भयस्य, इतिहासविषये तेषु विद्यमाना आधुनिककल्पना एव कारणम्। इयं कल्पना पाश्चात्त्यदेशेभ्यः समागता। एतादृशे इतिहासे घटनानां कूलङ्कषविवरणानि भवन्ति। बह्वीनां शताब्दीनाम् इतिहासः प्रायः अनेन मानदण्डेन मापयितुं शक्यः। अथापि तस्य अध्ययनेन जायमानः लाभः अल्पः। The only lesson that man learns from history is, that he does not learn from it ! इतिहासात् मनुष्येण अभ्यस्यमाना एका एव शिक्षा इत्युक्ते, तस्मात् सः किमपि न अभ्यस्यति इत्येव! – इति आङ्ग्लभाषायाम् एका प्रसिद्धोक्तिः। अपि च, अनादिकालात् धर्माधर्माणां सङ्ग्रामे एव विद्यमानस्य कर्मभूमेः भारतस्य एतादृशम् इतिहासं को वा बोधयेत्? ज्ञात्वा कः लाभः? सर्वेषां सङ्घर्षाणाम् अरिषड्वर्गः एव मूलं खलु। उक्तस्य पुनरुक्तिरूपे एतादृशे इतिहासे किं स्वारस्यं भवति? अतः अस्माकं सम्प्रदाये इतिहासस्य लक्षणमेव भिन्नम् : प्रवृत्ताः प्रमुखघटनाः आधृत्य, नवरसयुक्ताः कल्पनाः योजयित्वा, मनुष्यस्य आवश्यक्याः विद्यायाः बोधकं साहित्यमेव इतिहासः। एतस्मिन् प्रवृत्तानां घटनानां विचारे कूलङ्कषरूपेण चर्चा न भवेत्, न

भवति; ताभ्यः ज्ञेयस्य धर्मस्य विचारे चर्चा भवेत्, भवति। अस्यां दृष्टौ एव रामायणं महाभारतं च इतिहासः। अनया दृष्ट्या एव शङ्करस्य इतिहासः अपि द्रष्टव्यः।

सर्वेषु शङ्करविजयेषु अपि इतिहासः पुराणशैल्याम् अतीव रम्यतया च अस्ति। किन्तु आधुनिकपरिसरे प्रवृद्धेभ्यः उपन्यासस्य शैली अत्यन्तं रोचते। कतिपयदशकेभ्यः पूर्वं 'महाब्राह्मण', 'महाक्षत्रिय' इत्याद्यानां महाकृतीनां रचयिता देवुडुनरसिंहशास्त्रिवर्यः 'महासंन्यासी' इति शङ्करस्य इतिहासं रचितवान् आसीत् इति तत्समकालीनाः वदन्ति; किन्तु सा कृतिः न प्रकाशिता। अनन्तरं मैसूरुलक्ष्मीनरसिंहशास्त्रिणः तया एव शैल्या शङ्करस्य इतिहासं विलिख्य विख्याताः। भवतां हस्ते विद्यमानः 'महापरिव्राजकः' अपि तत्प्रकारकः उपन्यासः। एतस्मिन् तत्र तत्र शाङ्करसिद्धान्त-प्रतिपादनप्रयत्नः अपि कृतः। सरलतया यत्र यत्र प्रतिपादयितुं शक्यं तत्र सरलतया प्रतिपादितम्, अन्यत्र असरलतया सूचितम्। माधवीयशङ्करविजयमेव अनुसृतं चेदपि तत्रत्याः पद्मपादसम्बद्धाः केचन प्रसङ्गाः न योजिताः। गुरुभिः साकं मिलित्वा गिरेः स्तम्भेन सह तुलनां कृत्वा उपहासकरणं, गुरवः सुरेश्वराणां सकाशे स्वभाष्यस्य व्याख्यां रचयितुं यदा उक्तवन्तः तदा अन्यैः शिष्यैः सह समूहराजनीतिं कृत्वा गुरूणां विरोधकरणं, तेन भीतैः गुरुभिः सुरेश्वरेभ्यः दत्तस्य वचनस्य प्रतिस्वीकारः, सुरेश्वरैः पद्मपादेभ्यः शापप्रदानम् इत्येताः शङ्करपञ्चकस्य प्रत्येकं जनस्य निन्दाकारिण्यः कल्पनाः। ग्रन्थकाराः अपि अन्ते 'ऐतिह्यमाश्रित्य वदन्ति चैवं तदेव मूलं मम भाषणेऽपि । यावत्कृतं तावदिहास्य कर्तुः पापं ततः स्याद्द्विगुणं प्रवक्तुः - मया एवं कथने मूलं केनापि उक्तस्य श्रवणमेव, कर्तुः पापस्य द्विगुणं प्रवक्तुः भवति' इति उक्तवन्तः। तैः दत्तानि एतानि जागृतिवचनानि अहं गम्भीररूपेण विगणय्य एताः कल्पनाः सम्पूर्णरूपेण परित्यक्तवान्!

अन्यत्र कुत्रापि अविद्यमानम् अत्र विद्यमानम् अन्यदेकं नूतनं पात्रं पृथ्वीधराचार्यस्य। इयं कल्पना न। वेल्लालकुल उमामहेश्वरशास्त्रिणः स्वकीये एकस्मिन् ग्रन्थे 'एकोनशतं भाष्याण्यनार्षाणि पृथ्वीधराभिनवगुप्तप्रणीतानि तत्कालविद्यमानकर्तृकाणि छिन्नानीति प्रसिद्धम्' इति उक्तवन्तः। एतेन, पृथ्वीधरः सूत्रभाष्यकारः आसीदिति, शङ्करस्य दर्शनानन्तरं स्वस्य भाष्यं त्यक्तवान् इति च स्पष्टं भवति। पृथ्वीधरः बहुगौरवभाक् आसीदिति शास्त्रिणाम् अभिप्रायः। ओक्सफर्डनगरस्य बोड्लेन् ग्रन्थालये विद्यमानायाम् औफ्रेक्ट् केटलाग् नामिकायां विवरण्यां वैकुण्ठपुरीणां 'द्वादशमहावाक्यविवरणम्'



इति ग्रन्थस्य विवरणम् अस्ति। तत्र पृथ्वीधरः शङ्कराचार्याणां शिष्यः इति प्रोक्तम्; दशनामिसंन्याससम्प्रदायस्य प्रवर्तकः अयमेव इति उच्यते। 'पृथ्वीधराचार्यः तस्यापि शिष्याः दश। तीर्थाश्रमवनारण्यगिरिपर्वतसागराः सरस्वती भारती च पुरी नामानि वै दश।।' एवं पद्मपादादयः चत्वारः शिष्याः शाङ्करसिद्धान्तस्य प्रचारकाः अभवन्, तस्य सम्प्रदायस्य अनुशासनरक्षणसमर्थः पृथ्वीधराचार्यः तस्य सङ्घटकः अभवत्, तस्य संविधानस्य दायित्वमपि स्वीकृतवान्। अस्यामेव औफ्रेक्ट् विवरण्याम् अन्यस्मिन् उल्लेखे तं 'शृङ्गेरीपृथ्वीधराचार्यः' इति उक्तवन्तः। किन्तु शृङ्गेरीमठाधिपतीनाम् आवल्यां तस्य नाम नास्ति। अतः तस्य वार्धक्ये प्रायः सः शृङ्गेर्याम् उषितवान् स्यात् ।[1]

**- स्वामी परमानन्दभारती**

1. बि.जि. श्रीलक्ष्मीः, अद्वैत आचार्यरु, वासिष्ठ प्रकाशन -२०१०

Maha Parivrajaka

# १. कैलासात् कालटीं प्रति

केरलदेशस्य कश्चन ग्रामः। परितः हरित्कान्तिः। कल्पवृक्षवाटिकाः, कदली-वाटिकाः, निर्झरिण्यः च। एतेषां मध्ये एकस्मिन् गृहे कश्चन विशेषः। बान्धवाः, मित्राणि च मध्याह्नस्य भोजनं समाप्य तन्द्रामनुभवन्ति। अन्यस्मिन् प्रकोष्ठे कटानाम् उपरि विविधभङ्गिषु उपविश्य महिलाः जल्पनं कुर्वत्यः सन्ति। एका अवदत्; 'भोः! भगवति! आर्याम्बायाः अपत्यानि न जातानि, किं कष्टं तस्याः, तदेव दुःखं तस्याः।'

'अम्ब! का आर्याम्बा?'

'कालट्याः आर्याम्बा, शिवगुरोः पत्नी।'

'अहो! भवती न जानाति एव तर्हि! सप्तविंशतिवर्षाणाम् अनन्तरं तस्याः एकः पुत्रः जातः भोः! '

'एवं वा !'

'भोः! दृष्ट्वा आगताः वदन्ति, बहुसुन्दरः सामर्थ्यवान् च सः अस्ति इति।'

जानकी अवदत् : 'महान् बुद्धिमान् इति ! द्वितीये एव वयसि प्रश्नान् पृच्छन् आसीत् इति, तस्य पिता अपि उत्तरं न जानाति स्म इति च वदन्ति!'

कृष्णवेणी अवदत् : 'षष्ठे वयसि चतुरः अपि वेदान् अधीतवानिति, एकसन्धिग्राही इति च वदन्ति।'

'तृतीये वयसि एव तस्य उपनयनसंस्कारः जातः, गायत्रीमन्त्रसिद्धिः च जाता इति!'

'सत्यं भोः!.... अहमपि तदेव श्रुतवती। शिवगुरुः मृतवान् इति श्रुतम्। अहो! कष्टम्। सः एव गुरुकुलं चालयन् अस्तीति वार्ता श्रुता भोः!'

'विश्वसितुम् एव न शक्यते खलु।'

'मम आर्यः तत्प्रान्ते पौरोहित्यार्थं शश्वत् गच्छति। अस्मिन् पर्याये तेन सह गत्वा अहमपि दृष्ट्वा एव आगमिष्यामि' इत्यवदत् भगवती।

कः अयं बालकः?

अस्ति केरलदेशस्य कालटीग्रामे विद्याधिराजः, अत्रिगोत्रजः। तस्य पुत्रः शिवगुरुः। तं गर्भाष्टमे एव गुरुकुलं प्रति प्रेषितवन्तः। कृष्णयजुर्वेदाध्ययनं षडङ्गसहितम्[1]

१. शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्यौतिषं, कल्पः इति षडङ्गानि।



अभवत्। अनन्तरं मीमांसाशास्त्रस्य अध्ययनमपि जातम्। शिवगुरोः विंशतिः वर्षाणि अभवत्। सः गृहं प्रत्यागतः।

कालटीतः १०-१२ होराणां पादक्रमणात्मके दूरे 'वेलियनाडु' इति एकः ग्रामः। तत्र मघपण्डितो नाम विख्यातः विद्वान्। तस्य पुत्री आर्याम्बा। जन्मभूमौ तस्याः नाम सती इति। त्रयोदश वर्षाणि तस्याः वयः । कन्यार्थिनः बहवः आगत्य गताः। तेषु मघपण्डितः शिवगुरुं चितवान्। वधूवरयोः उभयोः पक्षीयाणाम् अपि आनुकूल्यम् अस्ति। वैभवेन आर्याम्बाशिवगुर्वोः विवाहः प्रवृत्तः।

शिवगुरुः गृहे गुरुकुलम् आरभत। प्रायः दश बालाः शिष्यरूपेण समागताः। गृहे सर्वदापि वेदघोषः। अध्ययनानन्तरं विश्रान्तिसमये बालकानां महती चेष्टा। गुरुः गुरुपत्नी च तत् दृष्ट्वा सर्वदा सन्तोषमेव अनुभवतः स्म, कदापि जुगुप्सां नानुभवतः। बहूनि वर्षाणि एव अतीतानि। दम्पत्योः दुःखमस्ति। २६ वर्षाणि अतीतानि चेदपि सन्ततिः नास्ति। सन्तानार्थं व्रतम् आचरणीयम् इति निश्चितवन्तौ। वृषभाद्रौ विद्यमानस्य वृषभाचलेश्वरस्य मासद्वयात्मकसेवार्थं सज्जता अभवत्। उत्तरायणे आगच्छति सत्येव, क्षयसंवत्सरस्य पुष्यशुद्धप्रदोषात् व्रतारम्भः, फाल्गुनशुद्धप्रदोषे समाप्तिः। तत्र यावन्ति दिनानि आस्तां तावन्ति दिनानि जपः, पूजा इत्यादीन् कुर्वन्तौ, आगतान् अतिथीन् विविधैः पाकविशेषैः अतर्पयताम्। मध्ये माघमासस्य शिवरात्र्यङ्गतया जागरणम् अभवत्। सहजतया एव परेद्यवि रात्रौ विशिष्टनिद्रा ! मध्येरात्रम् एकः वृद्धः आश्रयम् इच्छन् आगत्य द्वारं शब्दापितवान्। तस्मिन् समये अपि आर्याम्बा उत्थाय पाकं कृत्वा तस्मै परिवेषितवती। शिवगुरुः तस्य शयनार्थं व्यवस्थाम् अकरोत्। सन्तुष्टः सः वृद्धः परेद्यवि तयोः 'व्रतसङ्कल्पः सिद्ध्यतु' इति हृत्पूर्वकम् आशीर्वादं कृत्वा अगच्छत्। दम्पती व्रतं प्रपूर्य कालटीं प्रत्यागतौ।

वृषभाचलेश्वरस्य अराधनायां कृतायां सत्याम् अनुग्रहः न स्यात् किम्? प्रभव-संवत्सरस्य आरम्भे आर्याम्बा गर्भवती सञ्जाता। आपस्तम्बमतानुगुणं गर्भे व्यक्ते सत्येव पुंसवनम् आचरणीयम् ।[1] अयं गर्भरक्षणार्थं मनोबलवृद्ध्यर्थं च क्रियमाणः संस्कारः। तदनुसारं स्वाधिष्ठानाज्ञाचक्रयोः रङ्गवल्लिं कृत्वा तदुपरि कलशं स्थापितवन्तः ।[2] द्वे कन्ये मन्त्रपूतं वटस्य मुकुलं व्रीहिं च पीयुषे पेषयित्वा रसं निष्पीडितवत्यौ। पत्न्याः नासिकायाः दक्षिणे रन्ध्रे गच्छन्तं श्वासं दृष्ट्वा शिवगुरुः

१. व्यक्ते गर्भे पुंसवनं कुर्यात्।

२. स्वाधिष्ठानचक्रं जननेन्द्रियस्य अधः, आज्ञाचक्रं ललाटे च भवति।

MahaParivrajaka

रसम् अन्तः आसिक्तवान्। एतेन शुक्रप्राबल्यं, शोणितदौर्बल्यं च भवतः, येन पुत्रप्राप्तये मार्गः कल्पितः भवति। अनन्तरं मार्गशीर्षे सीमन्तोन्नयनसंस्कारः। रङ्गवल्ल्याः उपरि स्थापिते आसने दम्पती उपविष्टौ। आरम्भे होमः प्राचलत्। कलशस्य पुरस्तात् स्थापिता शलली, व्रीहिकणिशम्, शुष्कसुगन्धानि च मन्त्रपूतानि अभवन्। पत्नी पूर्वाभिमुखम् उपविष्टा। पतिः उत्तराभिमुखं स्थित्वा शलल्या पत्न्याः केशललाटयोः सन्धिमारभ्य सीमन्तम् उन्नीतवान्। अनन्तरं श्रीरागेण सोममन्त्रे पठ्यमाने सति एका सुमङ्गली तं वीणया गीतवती। बन्धुमित्राणां भोजनम् अभवत्।

अधुना आर्याम्बा दौहृदिनी। गर्भे विद्यमानस्य शिशोः इच्छानुसारं गर्भवत्याः चापल्यस्य आरम्भसमयः। तस्याः अधुना निरासक्तिः! गर्भरक्षणार्थं बहवः नियमाः पालनीयाः। नद्यां निमज्य स्नानं न करणीयम्, उपधानं विना शयनं न करणीयम्, व्यायामः नास्ति, सोपानारोहणं न करणीयम्, केशान् प्रसार्य न स्थातव्यम्, स्नानानन्तरं शुष्कीभवनार्थं केशाः प्रसारिताः चेदपि अनन्तरं वेणीबन्धनं करणीयम्। एकदा, नद्यां स्नात्वा कृष्णमन्दिरे पूजां समाप्य मङ्गलद्रव्यैः सह आर्याम्बा गृहं प्रविष्टा। तां गर्भवतीं शिवगुरुः एकदृष्ट्या दृष्ट्वा अवदत् : 'आर्ये ! भवत्याः मुखं पश्यामि चेत् कश्चन तेजस्वी एव गर्भे प्रवर्धमानः अस्तीति भासते !' आर्याम्बायाः मुखं रक्तवर्णयुक्तम् अभवत्! विभवनामसंवत्सरस्य वैशाखशुद्धपञ्चम्याम् आर्याम्बायाः प्रसववेदना आरब्धा। शिवगुरुः सूतिकागृहे एव करणीयस्य जातकर्मसंस्कारस्य सज्जताम् अकरोत् ।[१] 'दश मासेभ्यः भवत्या धृतः गर्भः सुखेन बहिरागच्छतु' इति वदन् शिवगुरुः पृष्ठं मर्दयन् सूतिकागृहं नीतवान्। सुखप्रसवार्थं 'मा त्वं विकेशी उर आवधिष्ठा' इति मन्त्रं पठितवान्। प्रसवानन्तरं नाभिवर्धनात् पूर्वं शिशुं स्पृष्ट्वा शिवगुरुः वात्सप्रमन्त्रान् अपठत्। गर्भजलपानदोषनिवारणार्थं, शिशोः मेधाशक्तिवृद्ध्यर्थं च मधु, धेन्वाः घृतं च अङ्गुलीयकेन मिश्रीकृत्य शिशुं भोजितवान्। अनन्तरं माता दक्षिणस्तनेन क्षीरम् अपाययत्।

दिनत्रयानन्तरम् आर्याम्बा 'शिशोः जातकं कथमस्ति?' इति यदा अपृच्छत् तदा शिवगुरुः 'सर्वं समीचीनमस्ति' इत्युक्त्वा तूष्णीकः संवृत्तः।

एकादशे दिने पूर्णिमायां नामकरणसंस्कारेण भवितव्यम्। प्रातः पिता, माता, शिशुः - एवं त्रयाणामपि स्नानम् अभवत्। नाम किं भवेत् इति विचारे दम्पत्योः मध्ये कश्चित्कालं चर्चा प्रवृत्ता। 'भवती वदतु' इति शिवगुरुः, 'भवान् वदतु' इति

१. प्राङ्नाभिवर्धनात् पुंसे जातकर्म विधीयते। - मनुस्मृतिः



MahaParivrajaka

आर्याम्बा। अन्ते शिवगुरुणा एव वक्तव्यमभवत्। शिवस्य कृपया जनिं प्राप्तः शिशुः। अस्मभ्यं शुभं कृतवान्। शं करोतीति शङ्करः, अतः शङ्करः इति नाम स्थाप्यते चेत् कथम्?'

'आम्... नाम अत्यन्तं समीचीनमस्ति। मम मनसि यत् आसीत् तदेव भवान् अपि उक्तवान्।'

शिवगुरुः देवताः पूजितवान्। रजतशरावे तण्डुलान् प्रसार्य तत्र हरिद्राखण्डेन 'शङ्करशर्मा' इति विलिख्य ब्राह्मणेभ्यः दर्शिते सति ते तत् स्पृष्टवन्तः। शिशुम् उत्सङ्गे शाययित्वा कटिसूत्रं बद्ध्वा, दक्षिणे कर्णे 'शङ्करशर्मा इति तव नाम' इति त्रिवारम् अवदत्। अनन्तरं 'स्वस्ति भवन्तो ब्रुवन्तु' इत्यवदत्। तस्य उत्तररूपेण ब्राह्मणाः 'स्वस्त्यस्तु' इत्यवदन्। ब्राह्मणेभ्यः आतृप्ति दानानि कृतानि। शिशुं प्रेङ्खायां शायितवन्तः। तस्य आयुरारोग्यनिमित्तं प्रार्थनाम् अकुर्वन्।

इतःपरम् अन्नप्राशनेन भवितव्यम्। सुवासिन्यः मणिपूरचक्रस्य रङ्गवल्ल्याः उपरि कलशस्थापनम् अकुर्वन्।[१] शिवगुरुः पञ्च यज्ञान्[२] परिसमाप्य पत्नीपुत्रसमेतः पीठे उपाविशत्। ब्राह्मणसभाम् उद्दिश्य 'नमस्सदसे। नमस्सदसस्पतये। नमस्सखीनां पुरोगाणां चक्षुषे..' इति मन्त्रानन्तरं दम्पती उत्थाय सभां नमस्कृतवन्तौ। गणपतिपूजा, पुण्याहवाचनं, नान्दीमुखम्, अभ्युदयश्राद्धं च अभवत्। शिवगुरुः व्याहृतीन् उक्त्वा यज्ञशिष्टं पायसान्नं प्रोक्ष्य शिशुं भोजितवान्। अनन्तरम् आर्याम्बा अपि भोजितवती।

अन्येषां शिशूनाम् अपेक्षया एकमासात् पूर्वमेव शिशुः शङ्करः चङ्क्रमणम् आरभत। सर्वेषां महदाश्चर्यम्। इतस्ततः गच्छन्तं शिशुं दृष्टवतां सर्वेषां तं गृहीत्वा लालनं करणीयम् इति अभिलाषः। अयम् अभिलाषः कस्यापि पूर्णतां न गतः। यतः शिशुः शरीरसङ्कोचं कृत्वा ग्रहीतुम् अवसरमेव न यच्छति स्म। बालिकानां तु तद्विषये कोपः एव आयाति स्म। भवान् महादुष्टः। कुप्यामि भवते' इति कोपेन उक्त्वा गच्छन्ति स्म।

* * * * * * *

एकवर्षसमाप्तिसमये शङ्करः मातृभाषया स्फुटतया भाषितुम् आरभत। एकस्मिन् दिने गृहे केवलं पिता, माता, शिशुः च किमपि जल्पन्तः उपविष्टाः आसन् । कञ्चित्कालं लालयित्वा पिता शिशुम् अपृच्छत् : 'अहं कः इति वदतु?'

१. यत्र मणिपूरचक्रमस्ति सा नाभिः आहारस्य जीर्णनं कृत्वा समग्रदेहे रसवितरणं कुर्वतः समानवायोः स्थानम्।

२. देवयज्ञः, पितृयज्ञः, ऋषियज्ञः, मानुषयज्ञः, भूतयज्ञः।

'कस्य ?' इत्यपृच्छत् शिशुः।

'कस्य इत्युक्ते कः अर्थः रे ?'

'न। मातुः भवान् पतिः, मम पिता। तदर्थं पृष्टवान्।'

माता अपृच्छत् : 'मम भवान् कः भवेत्?'

'पुत्रः।'

आर्याम्बा शिशुम् आलिङ्ग्य चुम्बित्वा स्तन्यपानं कारितवती।

* * * * * * *

एकस्मिन् दिने शिशुः द्वारद्वययुतात् एकस्मात् प्रकोष्ठात् द्वाभ्याम् अपि द्वाराभ्यां चङ्क्रमणेन गत्वा आगच्छन् आसीत्। बहुकालं यावत् एवं कुर्वन्तं शिशुं शिवगुरुः अवलोकितवान्। अन्ते आगत्य उपविष्टं शिशुं 'किम् अन्विष्यन् असि?' इति अपृच्छत्।

'किमपि अन्विष्यन् नासम्।'

'तर्हि किमर्थम् इतस्ततः गच्छसि?'

'इतः तत्र द्वाभ्याम् अपि मार्गाभ्यां गन्तुं शक्यते इति ज्ञातम्। तयोः कतरः समीपतरः इति पश्यन् आसम्' इत्यवदत् शङ्करः। दैवज्ञस्य पितुः अनेन उत्तरेण सन्तोषस्य अपेक्षया दुःखमेव अभवत्।

शिशुं द्रष्टुमागताः सर्वे कन्दुकं, पुत्तलिकां, चक्रं वा प्रयच्छन्ति स्म। तत् दृष्ट्वा झटिति शङ्करः स्वस्य लघुभ्यां हस्ताभ्यां गृहीत्वा बहुकालं यावत् पश्यति । अनन्तरं जिघ्रति । अनन्तरं चूषति, अनन्तरं मर्दयति, अनन्तरं प्रबलरूपेण भूमौ ताडयति । अनन्तरं क्षिपति स्म। पुनः तत् न पश्यति स्म अपि! एकस्मिन् दिने एतत् दृष्ट्वा 'किं भोः, क्षिप्तवान्, किमर्थम्?' इति अपृच्छत् माता।

शङ्करः अवदत् 'तस्य रूपं, वर्णं च दृष्टवान्, रुचिं दृष्टवान्, दृढम् अस्ति वा मृदु अस्ति वा इति दृष्टवान्, कुट्टयित्वा शब्दं श्रुतवान्। अनन्तरं द्रष्टुं तस्मिन् किमपि नावशिष्टमेव। अतः क्षिप्तवान्।'

इदमुत्तरं श्रुतवत्याः मातुः आश्चर्यं नाभवत्, अपि तु दुःखमभवत्।

शिवगुरुः शिशोः चूडाकर्म कर्तुं निश्चितवान्। 'संवत्सरे तु चौलेन आयुष्यं ब्रह्मवर्चसम्' इत्युक्तं स्मृतौ। अतः प्रथमवर्षस्य एकस्मिन् शुभे दिने शिशुः, माता, पिता च अभ्यञ्जनस्नानम् अकुर्वन्। शिवगुरुः नित्यकर्म प्रपूर्य पीठस्य उपरि उपाविशत्।



पुण्याहवाचनम्, नान्दीमुखम्, अभ्युदयश्राद्धं च अभवत्। माता शिशुः च पूर्वाभिमुखम् उपविष्टवन्तौ। अग्निप्रतिष्ठां कृत्वा एकस्मिन् पात्रे उष्णजलं, अपरस्मिन् शीतजलं, व्रीहीन्, गोमयं, लवित्रम्, शलली, दर्भान्, सुगन्धद्रव्याणि च स्थापितवन्तः। मातुः पुरस्तात् रम्भापत्रस्य अग्रे शर्करां, फलानि, क्षीरं, घृतं, मुद्गान्नं च स्थापितवन्तः। होमस्य अनन्तरम् उष्णजलं शीतजलं च मिश्रीकृत्य पिता शिशोः केशान् आर्द्रीकृतवान्। शिखां रक्षित्वा अन्येषां केशानां क्षौरम् अकुर्वन्। अधः पतितान् केशान् एकः ब्रह्मचारी वृक्षमूले पातितवान्, अनन्तरं शिशोः नीराजनम् अभवत्। अन्ते अक्षराभ्यासार्थं शरावे तण्डुलान् स्थापयित्वा गणेशविष्णुसरस्वतीनाम् आवाहनं कृत्वा पूजा कृता। हरिद्राखण्डेन शिशोः द्वारा 'ओं नमो नारायणाय, ओं नमः शिवाय' इति त्रिवारं लेखयित्वा मुखेन उच्चारणं कारितवन्तः। ब्राह्मणसुवासिनीनां भोजनम् अभवत्।

* * * * * * *

ग्रामस्य अन्यस्मिन् भागे एकः महान् वटवृक्षः। दर्भाहरणार्थं शिवगुरुः शिशुमपि स्वीकृत्य तत्र अगच्छत्। कार्यसमाप्तेः अनन्तरं यदा पिता पुत्रः च तूष्णीम् उपविष्टवन्तौ आस्तां तदा शङ्करः अपृच्छत् : 'जनक! इयं भूमिः, सूर्यः, चन्द्रश्च कदारभ्य सन्ति?'

'कोटिशः वर्षेभ्यः सन्ति। '

'एतत् सर्वं कथमागतम्?'

'पश्यतु भोः, अस्माकं जन्म अन्नात्, अन्नस्य सस्येभ्यः, सस्यानां भूमेः, भूम्याः जलात्, जलस्य अग्नेः, अग्नेः वायोः, वायोः आकाशात् च जन्म अभवत्। '

'आकाशः?'

'भगवतः।'

'भगवान्?'

'सः जनिमपि न प्राप्नोति, मरणमपि न । सः सर्वदा भवति।'

'कुत्र भवति?'

'सर्वत्र भवति।'

'एवं चेत् न दृश्यते एव!'

'पश्यतु भोः, वायोः अपेक्षया सूक्ष्मः आकाशः, आकाशस्यापेक्षया सूक्ष्मः भगवान्। आकाशः एव न दृश्यते! भगवान् कथं दृश्येत?'

Manjaka

'एवं चेत् तस्य अस्तित्वं कथं ज्ञायते?'

'एतत् सर्वं तस्मादेव आगतम् इति चेत्, सः भवेदेव खलु! कथमिति वदामि, शृणोतु। तत्र पतितं वटस्य फलम् आनय।'

शङ्करः आनीतवान्।

'तत् भञ्जय।'

'भङ्क्तवान्।'

'अन्तः किमस्ति?'

'किमपि नास्ति।'

'किमपि नास्ति चेत् तेन वटवृक्षः कथं भवति भोः? वृक्षस्य सृष्टिकर्त्री काचित् शक्तिः अस्ति चेदेव खलु भवति? किमपि अस्ति। किन्तु न दृश्यते, तावदेव। तद्वदेव इदं सर्वं स्रष्टुं समर्थः भगवान्। अत्यन्तं सूक्ष्मः सः अस्ति, किन्तु न दृश्यते।'

'न दृश्यते चेत् किं प्रयोजनम्?'

'द्रष्टुं शक्यः। किन्तु दर्शनम् अत्यन्तं कष्टम् इति वदन्ति प्राज्ञाः।'

* * * * * * *

अन्यस्मिन् दिने वाटिकायाः कर्मकरः बृहत् पनसफलं विदार्य दलानि एकस्मिन् कण्डोले संस्थाप्य गतवान्। एकस्मिन् पार्श्वे तूष्णीम् उपविष्टवन्तं शङ्करं दृष्ट्वा तस्मै एकं कार्यं वक्तव्यम् इति अभासत मातुः।

'रे शङ्कर, आगच्छ अत्र। अस्मिन् कति दलानि सन्ति इति गणनां कुरु। अहं नदीं प्रति गत्वा आगमिष्यामि। तावता गणनां कृत्वा समापय' इत्युक्त्वा सा गतवती। प्रत्यागमनानन्तरम् अपृच्छत् – 'बाल, कति सन्ति?'

शङ्करः 'एकम्' इत्यवदत्।

'मया गणयितुम् उक्तः कण्डोलः न भोः, तत्रत्यानि दलानि।'

'मातः! दलम् एव उक्तवान्, एकम् इति।'

'कण्डोलः पूर्णः अस्ति। एकमस्ति इत्युक्ते कः अर्थः रे?'

'मातः! अहं स्थापयामि, भवती गणयतु अथवा भवती स्थापयतु, अहं गणयामि।'

'भवानेव स्थापयतु, अहं गणयामि।'

शङ्करः स्वस्य लघुहस्तेन एकं दलं सावधानतया स्वीकृतवान्। माता 'एकम्' इत्यवदत्। तत् पार्श्वे संस्थाप्य अपरं स्वीकृतवान्। माता 'द्वे' इत्यवदत्।



'मातः! द्वे न, तदा भवती एव उक्तवती खलु इदम् एकम् इति' इत्यवदत् शङ्करः।

तस्याः ईषद्भ्रमः जातः।

अधुना किं करणीयम्? इति कञ्चित्कालं विचिन्त्य, स्वयमेव दलद्वयं युगपत् स्वीकृत्य तस्य हस्ते निधाय 'उपरि करोतु' इत्यवदत्। उपरि कृतवान्। माता 'द्वे' इत्यवदत्। शङ्करस्य नेत्रे प्रफुल्लिते। तद्द्वयमपि पार्श्वे संस्थाप्य स्वयमेव इतोऽपि दलद्वयं समकालम् उपरि कृत्वा हसन् मातरम् अपश्यत्।

माता 'चत्वारि' इत्यवदत्।

'मातः! चत्वारि न, इतःपूर्वं द्वे इति भवती एव उक्तवती खलु?' इत्यवदत् शङ्करः।

अधुना मात्रा किं वक्तव्यमित्येव न ज्ञातम्। 'भवान् महान् चटुलः' इति तस्य कपोलं मृदुतया निष्पीड्य गतवती। रात्रौ शिशोः शयनानन्तरम् आर्याम्बा पतिम् अपृच्छत् : 'मध्याह्ने पनसदलानां गणनावसरे भवान् अपि तत्रैव उपविष्टः आसीत् खलु, तस्मै किम् उत्तरं दातव्यमासीत् इति जानाति वा भवान्?'

'अहमपि न ज्ञातवान्। यदा सः ज्येष्ठः भवति तदा सः एव प्रष्टव्यः।'

* * * * * * *

गुरुकुलस्य विद्यार्थिनां सहवासेन शङ्करः स्वस्य वयसः तृतीये वर्षे एव संस्कृतं समीचीनतया अभ्यस्य तया भाषया भाषितुम् आरब्धवान्।

शिवगुरुः स्वस्य पञ्चाशत्तमे वयसि एव तीव्रतया अस्वस्थः अभवत्। स्वास्थ्ये अभिवृद्धिरेव न जाता। पत्नी, विद्यार्थिनश्च बहुसेवां कृतवन्तः। अथापि तं रक्षितुं न शक्तवन्तः; सः मृतः। दक्षिणाग्ररूपेण दर्भान् प्रसार्य बन्धवः तदुपरि शवं दक्षिणस्यां दिशि शिरः कृत्वा शायितवन्तः। एकस्मात् वर्षात् पूर्वमेव शिवगुरुः श्रौताग्नेः आत्मसमर्पणं कृत्वा, केवलम् औपासनाग्निं रक्षितवान् आसीत्। सगोत्रबन्धवः संस्कारार्थम् उद्युक्ताः। 'आयुषः प्राणम्न सन्तनु। प्राणादपानम्न सन्तनु।.. ' इत्यादिमन्त्रान् कर्णे उक्तवन्तः। औपासनाग्निमेव घटे स्थापितवन्तः। वृषभयुगलयुते शकटे शवं शायितवन्तः। केवलं शङ्करं विद्यार्थिभिः सह गृहे एव त्यक्त्वा अन्ये सर्वे श्मशानं गताः। शवसंस्कारं कृत्वा नद्यां स्नानादिकं च प्रपूर्य गृहं प्रत्यागताः।

मातामहं मघं शङ्करः अपृच्छत् : 'शायितं पितरं कुत्र नीतवन्तः?'

'शङ्कर! सः ऊर्ध्वलोकान् प्रति गतः भोः।'

'इत्युक्ते सः कदा आगमिष्यति?'

'सः इतःपरम् आगन्तुं न शक्नोति भोः।'

शङ्करः चिन्ताक्रान्तः जातः।

* * * * * * *

जामातुः मरणसन्दर्भे आगतः मघपण्डितः तत्रैव उषित्वा पुत्र्याः समाधानं कुर्वन् आसीत्। आर्याम्बा मौनेन एव बहूनि दिनानि यापितवती। एकस्मिन् दिने मघपण्डितः शङ्करस्य उपनयनसंस्कारविषये प्रस्तावं कुर्वन् अवदत् : 'गृहे प्रचलत् गुरुकुलं पिहितम्। वेदघोषः अपि नास्ति। मनः अनुत्साहितमस्ति। अहमेकं वचनं वदामि, शृणोति किम्?'

'किम्?'

'पुत्रस्य उपनयनं क्रियते चेत् मनः उत्साहपूर्णं भवति। संस्कृतेन अधुना एव सः सम्यक् भाषते। उच्चारणं स्पष्टमस्ति। तीक्ष्णबुद्धीनां तृतीये वयसि अपि कर्तुं शक्यम्। आपस्तम्बः 'गर्भाष्टमेषु ब्राह्मणमुपनयीत, गर्भैकादशेषु राजन्यः गर्भद्वादशेषु वैश्यः' इति प्रोक्तवान्। शङ्करेण क्रियमाणं सन्ध्यावन्दनम्, अग्निकार्यं च पश्यामः चेत् मनः सन्तुष्टं भवति। तस्य उपनयनं कारयतु।'

'उपनयनं परिसमाप्य भवान् इतः गमिष्यति। अनन्तरं सः मां किमपि किमपि पृच्छति। उपनयनसंस्कारः किमर्थं करणीयः? अनन्तरं तेन किं करणीयम्? किमर्थं करणीयम्? इति आदौ सर्वं माम् उद्बोधयतु' इति उक्तवती आर्याम्बा।

'वदामि शृणोतु; गर्भस्थशिशौ द्वितीये मासे कदाचित् प्राणाः उद्भवन्ति। प्रायः पञ्चमे मासे ज्ञानेन्द्रियाणि उद्भवन्ति। मनः बुद्धिः च कार्यमारभते। तदा पूर्वजन्मस्मृतिः अपि भवति। जन्मनि प्राप्यमाणे सत्येव सा स्मृतिः नश्यति; किन्तु मनः बुद्धिः च सुप्ततया भूत्वा अनन्तरं क्रमशः वर्धेते। मनः इत्युक्ते सङ्कल्पविकल्पान् प्राप्नोति। जनिं प्राप्ते शिशौ क्रमशः शब्दस्पर्शरूपरसगन्धैः वस्तूनि परीक्ष्य जानति सति मनः प्रवर्धते, साधारणतया इयं वृद्धिः षष्ठे वयसि स्थगिता भवति। तावत्पर्यन्तं बुद्धेः विकासः न आरभते।'

'तत् कथं ज्ञायते?'

'बुद्धिः इत्युक्ते साध्वसाधूनां निर्णायिका। तद्राहित्येन शिशवः नग्नतया भ्रमणेऽपि



लज्जां नानुभवन्ति। निष्कारणं हसन्ति, निष्कारणं रुदन्ति। बुद्धेः विकासे आरब्धे सति लज्जामनुभवन्ति, निष्कारणं हासः रोदनं च स्थगितं भवति। इदं प्रायः षष्ठे वयसि जायते। किन्तु शङ्करः अधुना एव कौपीनम् अधृत्वा न भ्रमति एव, निष्कारणं हासः रोदनं च तस्य नास्त्येव। भवत्याः पुत्रः अतीव तीक्ष्णः अस्ति। अतः उपनयनसंस्कारं कारयतु। शास्त्रसम्मतिरस्ति।[1] चित्तमित्युक्ते स्मरणसामर्थ्यम्। तत् ७-८वयसः अनन्तरं वर्धते। तदा गुरुकुलं प्रेषयन्ति।'

'उपनयनानन्तरं सूर्योपासनमेव किमर्थं कुर्वन्ति?'

'सूर्येण बुद्धिप्रचोदनं भवति। कथमिति पश्यतु, मन्दबुद्धीनां ग्रहणकाले उन्मादः अधिकः भवति। यतो हि तदा सूर्यशक्तिः न्यूना। एतेन बुद्धिप्रचोदनकर्ता सूर्यः इति ज्ञायते। अतः यदा बुद्धिविकासः आरभ्यते तदा सूर्योपासनायाः आरम्भः भवेत्।'

उपनयनार्थं पुत्र्याः अङ्गीकारे प्राप्ते सत्येव मघपण्डितः शुभदिनं निर्णीतवान्।

पूर्वेद्युः अभ्यञ्जनम्, उदकशान्तिः, गणपतिपूजा, कुम्भतीर्थप्रोक्षणं, प्राशनं, नान्दीश्राद्धं, भोजनं च समाप्तम्। सपत्नीकः मघपण्डितः एव दौहित्रस्य उपनयनार्थं सङ्कल्पं कृतवान्। परेद्यवि अपि अभ्यञ्जनम् अभवत्। वटोः वाग्बलस्य बुद्धिबलस्य च अनुग्रहकर्त्र्यः विशुद्धाज्ञाचक्रयोः देवताः। सुमङ्गल्यः तयोः चक्रयोः रङ्गवल्लिं कृत्वा तदुपरि कलशस्थापनां कृतवत्यः। अनन्तरं वटोः क्षौरं स्नानं च कारितवन्तः। काषायवस्त्रधारणमभवत्[2]। अनन्तरं मौञ्जीबन्धनं, कृष्णाजिनधारणं च अभवत्। देवताभ्यः हविः अर्पयित्वा मघः वटोः गायत्रीमन्त्रोपदेशं कृतवान्। अनन्तरं समिदाधानं परिसमाप्य, रक्षां संस्थाप्य-आत्रेयार्चनानसश्यावाश्वेत्यार्षेयप्रवरान्वितात्रेयसगोत्रः आपस्तम्बसूत्रः यजुश्शाखाध्यायी शङ्करशर्माहं भोः अभिवादये इति वटुः यज्ञेश्वरं नमस्कृतवान्। ब्रह्मवर्चसा युक्तं शङ्करं जनाः तदेकचित्ततया पश्यन्ति स्म। उन्मीलिते तस्य नेत्रे अन्तर्मुखे आस्ताम्। भिक्षादानार्थं सज्जासु स्त्रीषु कासाञ्चन वामनस्य स्मरणमभवत्, काभिश्चित् स्थापितया भिक्षया सह तासाम् आनन्दबाष्पाण्यपि अपतन्, काश्चन भिक्षादानमपि विस्मृत्य वटोः नमस्कारं कृतवत्यः। रात्रौ आर्याम्बा तस्य कुदृष्टिनिवारणं कृतवती।

---

१. गर्भाष्टमेषु इत्यत्र बहुवचननिर्देशात् तृतीयवर्षादारभ्य उपनयनस्य कालः उक्त इत्यवगन्तव्यं यथा भगवत्पादानां तृतीये वर्षे उपनयनं श्रुतम् ।

- सुदर्शनसूरिव्याख्यानम्, आपस्तम्बगृह्यसूत्रम् - १.१

२. काषायं ब्राह्मणो माञ्जिष्ठं क्षत्रियो हारिद्रं वैश्येति - आपस्तम्बसूत्रम्

परेद्यवि मघः सन्ध्यावन्दनं पाठयन् गायत्र्याः विचारे वटोः कृते प्रवचनं दत्तवान्: 'गायत्रीजपारम्भात् पूर्वं तस्य मन्त्रस्य ऋषिदेवताछन्दांसि स्मर्तव्यानि इति विधिः। गायत्रीमन्त्रस्य विश्वामित्रः ऋषिः, सूर्यः देवता, निचृद्गायत्री छन्दः। विश्वामित्रः अस्य वैवस्वतमन्वन्तरस्य आदौ जनिं प्राप्तेषु सप्तर्षिषु अन्यतमः, ब्रह्ममानसपुत्रः, गतजन्मनि कौशिकः सन् कृतस्य तपसः फलतया भगवतः अनुग्रहेण अस्मिन् जन्मनि गायत्रीमन्त्रस्य स्मृतिं प्राप्तवान्। अपि च सूर्यः अस्माकं बुद्धीनां प्रचोदकः श्रेष्ठः देवः। नः धियः यः प्रचोदयात् तद्वरेण्यं सवितुः तद्देवस्य भर्गः धीमहि-तस्य देवस्य तेजः ध्यायन्तः स्मः इति तस्य मन्त्रस्य अर्थः। छन्दसः नाम गायत्री इति। रूढौ तेनैव नाम्ना मन्त्रः व्यवह्रियते। एतस्मिन् त्रयः पादाः - इत्युक्ते पङ्क्तयः। एकैकस्मिन् अष्ट अक्षराणि भवन्ति। किन्तु प्रथमपङ्क्तौ तत्सवितुर्वरेण्यं इति सप्त अक्षराणि भवन्तीत्यतः तत् निचृद्गायत्रीछन्दः इत्युच्यते। गायत्र्युपासना इत्युक्ते तैलधारा इव सूर्यदेवे मनसः प्रसारणम्; अन्यत्र यथा न गच्छेत् तथा मनसः स्तम्भनं करणीयम्। अवगतं किम्?'

'अवगतम्। सूर्यस्य बुद्धिं के प्रचोदयन्ति?'

'सः महान् परमात्मा एव प्रचोदयति। सः सूर्यः इव प्रत्यक्षः न। अतः प्रत्यक्षसूर्यस्य ध्यानेन आरभ्य, क्रमशः तस्य परमात्मनः पर्यन्तं मनः प्रसारणीयम्।'

'तस्य परमात्मनः स्थानं किम्?'

'हृदयमेव तस्य स्थानम्।'

'मन्त्रे नः धियः' तथा 'धीमहि' इति बहुवचनम् अस्ति खलु? तस्य कः अर्थः?'

'एतत् ब्राह्मणानां दायित्वस्य समष्टिरूपं दर्शयति। ब्राह्मणस्य जीवनमेव अन्येषां धनेन। एतत्, तेन क्रियमाणस्य अध्यापनस्य याजनस्य च दक्षिणा इत्यतः अध्यापन-याजनाभ्यामेव तस्य ऋणविमुक्तिः न भवति। तेन द्वारा समाजेन इतोऽपि प्राप्तव्यम्। तेन क्रियमाणे तपसि षष्ठः भागः प्रजाः अनुगच्छति इति शास्त्रवचनम्। एतैरेव तेषां योगक्षेमम् इत्यतः गायत्रीजपः सर्वेषां ब्राह्मणानां कर्तव्यम्।'

'ह्यः अन्ते मया भिक्षा स्वीकृता, तस्य अर्थः कः?'

'भवान् अग्रे विद्याभ्यासार्थं यदा गुरुकुलं गमिष्यति, तदा तत्र भिक्षाद्वारा एव जीवितव्यम्।'

'किमर्थम्?'



'विद्यार्थिनः सर्वे गुरुकुले एव भोजनं कुर्वन्ति चेत् गुरोः गुरुपत्न्याः च भारः अधिकः भवति। तत् न समीचीनम्। अतः ब्रह्मचारिणः भिक्षाटनं कृत्वा एव जीवेयुः। भ्रमरः पुष्पेभ्यः यथा मधु सङ्गृह्णाति तथा बहुभ्यः गृहेभ्यः किञ्चित् किञ्चित् आहारः प्राप्तव्यः। अतः एतत् मधुकरी इत्युच्यते। एतेन ब्रह्मचारिणः सर्वास्वपि गृहिणीषु मातृभावः सञ्जायते। जिह्वाचापल्यं न्यूनं भवति। समाजविषये कृतज्ञताभावः सञ्जायते। अग्रे अध्यापनेन ऋणात् मुक्तिः प्राप्तव्या इति इच्छा सञ्जायते। एतेन अध्ययनाध्यापनानां परम्परा अविच्छिन्नतया अनुवर्तमाना भवति। '

* * * * * * *

मघपण्डितः स्वग्रामं वेलियनाडुं प्रति गत्वा आगच्छन् आसीत्। यथाशक्ति अधिकं समयं यावत् पुत्र्या दौहित्रेण च सह भवितव्यम् इति तस्य आशयः। एकस्मिन् दिने सः पुत्रीं प्रति अवदत् : 'शङ्करस्य अधुना पञ्चमं वर्षम् । सः गुरुकुलं प्रति प्रेषणीयः। वेलियनाडु बहुदूरे अस्ति। भवत्या यदि पुत्रः द्रष्टव्यः तर्हि तत्र गत्वा आगमनं दुश्शकम्। सः इतोऽपि बालः। अतः पार्श्वस्थे ग्रामे विद्यमानं नारायणदीक्षितानां गुरुकुलं प्रति प्रेषयतु। आवश्यकतायां सत्यां दृष्ट्वा आगन्तुं शक्यते।'

आर्याम्बा तत् अङ्गीकृत्य पुत्रं दीक्षितानां समीपे प्रापय्य आगतवती। गृहं प्रति यथापूर्वं बन्धुमित्राणि आगत्य गच्छन्ति चेदपि पुत्ररहितं गृहं तया रिक्तं दृश्यते। शङ्करः मातामहेन उक्तरीत्या गुरुकुले स्वस्य वयसः अनुगुणं लघुसेवाः करोति स्म। समिद्दर्भाणाम् आहरणार्थं ज्येष्ठशिष्यैः सह गच्छति स्म। भिक्षार्थं गच्छति चेत् सर्वे विशेषप्रेम्णा तस्मै भिक्षां प्रयच्छन्ति स्म। आनीतां भिक्षाम् आचार्येभ्यः समर्प्य तेषाम् अनुज्ञया भोजनं करोति स्म। विशिष्टं किमपि अस्ति चेत् सर्वैः सह खादति स्म। गच्छता कालेन मातामहस्य वचनानि तथ्यपूर्णानि इति अनुभवेन तेन ज्ञायते स्म। जिह्वाचापल्यं न्यूनम् अभवत्। समाजस्य विषये कृतज्ञता सञ्जाता। 'अग्रे अध्यापनेन अस्मात् ऋणात् मुक्तिः प्राप्तव्या' इति भावः प्रबलः अभवत्।

एकस्मिन् दिने गुरुकुलं प्रति आगच्छन्तीम् अर्याम्बां दूरादेव दृष्ट्वा नारायणदीक्षिताः पत्नीं प्रति अवदन् : 'पश्यतु, मातृहृदयं खलु! आगतस्य शङ्करस्य इतोऽपि सप्ताहः अपि नाभवत्, तावता एव तं द्रष्टुम् आगच्छन्ती अस्ति तस्य माता।' गृहप्राप्त्यनुक्षणं आर्याम्बा गुरुपत्नीं दृष्ट्वा, पुत्रस्य योगक्षेमं विचारितवती। समिदाहरणार्थं

सर्वैः बालकैः सह शङ्करः गतवानिति, स्वल्पेनैव कालेन आगमिष्यतीति च सा अवदत्।

'भवत्याः पुत्रः अतीव विशिष्टः। तस्मिन् सर्वेषां महती प्रीतिः। बहुबुद्धिमान्, विनयशीलः, विधेयश्च। बहुकालं यावत् सन्तानं न प्राप्तवती चेदपि अन्ते श्रेष्ठं पुत्रमेव प्राप्तवती।'

आर्याम्बायाः नेत्राभ्याम् अश्रु निर्गतम्।

'भवती किमर्थं रोदिति?'

'सः विरक्तः भवतीति। ह्यः रात्रौ स्वप्ने सः संन्यासी जातः इति दृष्टवती। दुःखं सोढुम् अशक्ता अहं द्रष्टुम् आगतवती।'

'अये! एवं वा?'

'तस्य सकाशे एतत् सर्वं कृपया मा वदतु अम्ब!'

'न न, न वदामि।'

शङ्करे प्रत्यागच्छति सत्येव मातरं दृष्ट्वा नमस्कृतवान्। माता तस्य मस्तकं मर्दयन्ती 'वत्स! अपि कुशली?' इति अपृच्छत्।

'कुशली अस्मि मातः!'

सज्जीकृत्य आनीतं भक्ष्यं माता पुत्राय दत्तवती। सः सर्वेभ्यः वितीर्य स्वयमपि खादितवान्।

स्वस्य पाठसमये एव अन्येषां पाठमपि श्रुत्वा, शङ्करः शीघ्रमेव स्वशाखायाः वेदाध्ययनं पूरितवान्। एकसन्धिग्राही सः एकस्मिन् एव वर्षे षडङ्गसहितान् चतुर्वेदान् पूर्णतया अधीतवान्। गुरुपत्नी एकदा पतिम् अपृच्छत्, 'आर्य! तस्मै किमर्थं पाठनम्? सः सर्वं जानात्येव।'

'मया तस्य पाठनं क्रियते मम उद्धारार्थं, तस्मै पाठयितुं न' इत्यवदन् दीक्षिताः। अन्येषां छात्राणाम् अस्य विषये महती प्रीतिः, अपारं गौरवं च आसीत्।

एकस्मिन् दिने अपराह्ने विद्यार्थिनः सर्वे नद्यां स्नात्वा प्रत्यागच्छन्तः सन्ति। एकः अवदत्, 'प्रातः काष्ठच्छेदनेन शरीरं स्विन्नं सत् असह्यमासीत्। मृदा परिमार्ज्य स्नानकरणानन्तरं शुद्धमभवत्। आनन्दः जायते।'

अन्यः अपृच्छत् 'मृदा परिमार्ज्य स्नानं क्रियते चेत् किमर्थं शरीरं शुद्धं भवति भोः?'

'अहं न जानामि भोः!'



Maha Parivrajaka

'शङ्कर! किमर्थं भवति भोः?'

'मृत् कारणं भोः, स्वेदः कार्यम्।'

'अहं यथा अवगच्छेयं तथा किञ्चित् सरलतया वदतु भोः।'

'पश्यतु भोः, गते सप्ताहे अस्माभिः अधीतः मन्त्रः स्मरणे अस्ति किम्? – 'पृथिव्या ओषधयः, ओषधिभ्योऽन्नम्, अन्नात् पुरुषः' इति। ततः अनन्तरं किं जानाति वा?' इति हसितवान् शङ्करः।

'किम्?'

'पुरुषात् पुरीषम् ।'

सर्वे उच्चैः हसितवन्तः। शङ्करः अनुवर्तितवान्। 'भगवतः अस्माकं च भेदं पश्यतु। सः मलं फलीकरोति। वयं फलं मलीकुर्मः। मलं, मूत्रं, स्वेदः – एतत् सर्वं पुरुषात् उत्पद्यते। पुरुषः पृथिव्याः आगतः। अतः अस्य मालिन्यस्य मूलं कारणं मृत् एव खलु? तस्यां दुर्गन्धोऽपि नास्ति, सुगन्धोऽपि नास्ति भोः। अतः एव विविधेभ्यः प्राणिभ्यः एतावान् दुर्गन्धः उत्पद्यते। फलपुष्पपत्रेभ्यः सुगन्धोऽपि उत्पद्यते। भूमौ पतनानन्तरम् तदुभयस्यापि नाशः भवति, निर्गन्धा मृत् एका एव अवशिष्यते। मृदा परिमार्ज्य स्नानकरणेन शुद्धिः भवति तदर्थमेव।'

'मृदि अविद्यमानः सुगन्धः दुर्गन्धः वा ततः कथम् आयाति भोः?'

'मृत् मृदेव भवति चेत् सुगन्धोऽपि नायाति, दुर्गन्धोऽपि नायाति भोः। जलम् औष्ण्यं च परस्परं सम्मिलति चेत् मृदः तत्सर्वम् उत्पद्यते। सहवासदोषः। वयमपि एकाकिनः एव भवामः चेत् गम्भीररूपेण भवामः, समूहशः मिलामः चेत् चेष्टां कुर्मः खलु – तद्वदेव।'

एकदा शङ्करः एकं लघु गृहं गत्वा 'भवति भिक्षां देहि' इत्यवदत्, उत्तरं नास्ति। पुनः अपि तदेव जातम्। तृतीयवारं 'भवति भिक्षां देहि' इति उक्ते सति गृहस्य अन्तर्भागात् 'हे माणवक! अस्माकं गृहे किमपि नास्ति। वयं बहु निर्धनाः' इत्यवदत् काचित्।

'भवती किं ददाति चेदपि स्वीकरोमि, पश्यतु'। अन्तः ईषत् सन्तोषः, भाण्डानां शब्दः। अन्ते, काचित् स्त्री लवणे स्थापितम् एकम् आमलकं तस्य पात्रे संस्थाप्य 'भोः! अन्ये सर्वे भवते बहु किमपि प्रयच्छन्ति। मम समीपे तु एतावन्मात्रमेव अस्ति। एतदेव स्वीकरोतु' इत्युक्त्वा रोदनं कृतवती। शङ्करस्य बहु दुःखं जातम्। तस्यां रात्रौ स्वप्ने शङ्करः महालक्ष्मीं दृष्टवान्। अयाचत : 'अम्ब!, कृपया तां

स्त्रियं समृद्ध्या अनुगृह्णातु।'

'तत् कथं भवति शङ्कर? पूर्वतनजन्मसु धनम् आसीत् चेदपि सा किञ्चिदपि दानं न कृतवती। तस्याः समृद्धिः कथं भवेत्? अहं तु कर्मणाम् अनुसारमेव फलदात्री इति भवान् न जानाति किम्?'

'अम्ब! निर्धनतायाः कष्टे सत्यपि अधुना मह्यम् आमलकं दत्तवती खलु? तस्य वा फलं भवतु।'

महालक्ष्मीः 'तथास्तु' इति आश्वासनं दत्तवती। दानफलं, दानं कस्मै कृतम् इत्यपि अनुसरति खलु! निद्रातः जागरणानन्तरं शङ्करः कनकधारास्तोत्रम् अरचयत्। झटित्येव तस्याः कष्टानि दूरं गतानि। अधुनापि तद्गृहस्थाः इमां गाथां वदन्ति, तेषां गृहस्य नाम 'स्वर्णत्तिल्लं' - सुवर्णस्य गृहम् इति।

एकस्मिन् दिने गुरवः, 'शङ्कर! पुराणानि, रामायणं, महाभारतं च भवानेव स्वयं पठतु। यत्र अवगमनं न भवति तत्र पृच्छतु' इत्युक्त्वा तेषां ग्रन्थानां ग्रन्थीन् प्रादर्शयन्। शङ्करस्य सन्देहपरिहारप्रसङ्गः एव नागतः। तेषां ग्रन्थानाम् अध्ययनं पूर्णम् अभवत्। गुरुकुलवासस्य इतोऽपि सार्धैकवर्षमपि पूर्णं न जातम्। गुरवः अवदन्, 'शङ्कर! अत्र भवता यद्यद् अध्येतव्यं तत्सर्वम् अधीतम्। इतःपरं मीमांसाशास्त्रम् अध्येतव्यम्। तदर्थं समीपे किमपि गुरुकुलं नास्ति; दूरं गन्तव्यं भवति। भवान् इतोऽपि बालः। दूरगमनं कष्टम्। भवतः मातापि भवन्निमित्तं बहुधा परितपति। सद्यः गृहं गच्छतु। गृहे एव भवान् अध्यापनं करोतु।'

तस्मिन् दिने गुरुपत्नी बालकान् कानपि भिक्षार्थं न प्रेषितवती । गृहे एव सर्वेषामपि मिष्टान्नसहितं भोजनं कारितवती। सप्तवर्षदेशीयः अयं बालकः यदा प्रतिनिवर्तनाय सज्जः अभवत् तदा गुरवः, गुरुपत्नी, तेषाम् अपत्यानि, विद्यार्थिनः इत्येवं सर्वे अरुदन्। गुरून्, गुरुपत्नीं च साष्टाङ्गं प्रणम्य शङ्करः कालटीं प्रति गतः।

शङ्करे प्रत्यागते सति, तस्य प्रसूत्यवसरे यावान् आनन्दः जातः आसीत् तावानेव आनन्दः आर्याम्बायाः जातः। गृहे एव गुरुकुलस्य आरम्भः अभवत्। गुरुदक्षिणारहिता पाठशाला। दिने दिने केरलेषु शङ्करस्य कीर्तौ प्रसरन्त्यां सत्यां, जिज्ञासवः तम् अन्विष्यन्तः सुदूरात् आगन्तुम् आरभन्त। गृहे सर्वदा जनाः। भोजनादिसत्कारान् कर्तुम् आर्याम्बायाः कष्टे जाते सति आगताः जनाः एव पाकं कृत्वा, परिवेषणं कृत्वा अनन्तरं स्वयमपि भुक्त्वा गच्छन्ति स्म। केरलस्य राजा कुलशेखरवर्मा वार्तां प्राप्तवान्। झटिति सः शङ्करस्य दर्शनं कर्तुम् इष्टवान्। उपायनैः



सह मन्त्रिणं सम्प्रेष्य तम् आनेतुम् उक्तवान्। शङ्करस्य गृहमागतः मन्त्री दक्षिणां, मौल्ययुताः कौशेयवेष्टीः, फलानि च तस्य पुरस्तात् संस्थाप्य राज्ञः इच्छां विज्ञापितवान्। शङ्करः केवलं फलानि स्वीकृतवान्। आगन्तुं न शक्यते इत्युक्त्वा अन्यत्सर्वं प्रतिप्रेषितवान्। मन्त्री एकाकी एव यदा प्रतिनिवृत्तः तदा शङ्करस्य विषये मया कथं व्यवहर्तव्यम् इति राजा कुलशेखरवर्मा अवगतवान्। सः स्वयमेव अगच्छत्। स्यन्दनं गृहात् दूरे संस्थाप्य पद्भ्यां गतवान्। सन्तोषेण आर्याम्बा राजानं स्वागती- कृतवती। राजा साष्टाङ्गं शङ्करं नमस्कृत्य विनम्रतया उपविश्य, 'मया प्रेषितं किमपि भवन्तः न स्वीकृतवन्तः एव' इत्यवदत्।

'तथा न। अहं ब्रह्मचारी। मया किमपि न स्वीकर्तव्यम्। वर्णाश्रमधर्माणां रक्षणस्थाने विद्यमानेषु भवत्सु मया एव धर्मस्य उल्लङ्घनं न करणीयं खलु?'

'भगवन्, भवतः गृहे पितृपादाः न सन्ति। आगन्तॄणां सङ्ख्या अपि अधिका। अतः प्रेषितवान्।'

'भगवतः कृपया भवतां पोषणेन च सर्वं समृद्धमस्ति।'

राजा तेन रचितानि नाटकानि प्रदर्श्य समीक्षा विधेया इति विज्ञापितवान्। तस्य पुरस्तादेव तेषु विद्यमानान् लघुलघुव्याकरणदोषान् परिमार्ज्य, शङ्करः 'समीचीनमस्ति' इति प्रत्यर्पितवान्।

'मम एका विज्ञापना। मम सन्तानभाग्यं नास्ति, अनुग्रहः करणीयः।'

शङ्करः सन्तानार्थं करणीयं कर्म संसूच्य आशीर्वादं कृत्वा फलं दत्त्वा प्रेषितवान्। आर्याम्बायाः पुत्रस्य विचारे अभिमानः सन्तोषश्च अधिकः अभवत्।

एकस्मिन् दिने कृष्णदेवालये पूजां कृत्वा, वस्त्राणि प्रक्षालयितुम् आर्याम्बा नदीं गतवती। मध्याह्नकालिकः केरलदेशीयः आतपः। सिकताः अत्यन्तं दहन्ति। प्रत्यागमनसमये स्खलिता सती सा अपतत्। ये दृष्टवन्तः ते, 'शङ्कर! माता पतितवती' इति दूरात् उच्चैः आक्रोशनं कृतवन्तः। शङ्करः धावितवान्। तेन सह विद्यार्थिनः बालकाः अपि धावितवन्तः। वहनेन तस्याः आनयनं केनापि न शक्यम् आसीत्। शङ्करः अनुक्षणमेव अधः पतिताः आर्द्राः शाटिकाः भूमौ प्रसार्य तासाम् उपरि तां चालितवान्। कथञ्चित् गृहं प्राप्तम्। शङ्करस्य व्याकुलता। 'वस्त्रप्रक्षालनार्थं प्रतिदिनं नदीं प्रति गन्तव्यमेव। इदं कार्यं माता अन्येषां द्वारापि न कारयति, अहं बालः इति मह्यमपि न ददाति.. किं करवाणि?' इति चिन्तयन् आसीत्। तेन किमपि कर्तुं न शक्यमासीत्। किन्तु, कस्य बलं वा? कस्यापि अनुग्रहः वा? अथवा

काकतालीयं वा?, परेद्यवि स्नानार्थं गत्वा पश्यति, तस्मिन् तटे प्रवहन्ती पूर्णानदी तटान्तरं प्रति पात्रस्य परिवर्तनं कृतवती अस्ति। शङ्करस्य महान् आनन्दः। किन्तु जलं कृष्णदेवालयं घट्टयति स्म। वृष्टिकाले प्रवाहे आगते सति देवालयस्य अन्तः जलप्रवाहस्य भीतिः आसीत्। शङ्करः विधिपूर्वकं नदीतटात् उपरि आनयनेन कृष्णमूर्तेः स्थानं परिवर्तितवान्।

* * * * * * *

'अम्ब! केऽपि आगताः' इति कश्चन छात्रः उच्चैः कथितवान्। शङ्करः गृहे नास्ति। अस्वस्थान् गुरून् द्रष्टुं पार्श्वग्रामं गतवान् आसीत्। आर्याम्बा पाकशालातः बहिरागता। आगन्तुकान् दृष्ट्वा 'आगच्छन्तु, आगच्छन्तु। बाल! तेभ्यः सर्वेभ्यः आसनानि स्थापयतु' इत्यवदत्। आगताः चत्वारः विद्यार्थिना स्थापितानां पीठानाम् उपरि उपविष्टवन्तः।

'भवन्तः के?'

'वयं तिरुवनन्तपुरस्थाः। एतौ द्वौ न्यायशास्त्रपण्डितौ, अयं दैवज्ञः, अहं किञ्चित् मीमांसाशास्त्रम् अधीतवानस्मि। वृषभाद्रौ कस्यचन गृहम् आगतवन्तः आस्म, भवत्याः पुत्रस्य विषये बहुधा श्रुतवन्तः। तमेव द्रष्टुमागताः। कुत्र भवत्याः पुत्रः?' इति उक्तवान् तेषु अन्यतमः।

'सः गुरूणां दर्शनार्थं पार्श्वग्रामं प्रति गतवान्, आगमिष्यति। उपविशन्तु' इत्युक्त्वा आर्याम्बा आतपे आगतेभ्यः तेभ्यः पानकं दत्तवती। लोकवार्ताः वदन्ती दैवज्ञेभ्यः पुत्रस्य जातकं दत्त्वा परिशीलयितुम् अवदत्। ते किमपि गणनां कृत्वा 'अम्ब, इदं जातकम् असामान्यम्, अयं महान् विद्वान् भविष्यति। वाक्स्थाने बृहस्पतिः अस्ति। अयं लोकपूज्यः भविष्यतीत्यत्र नास्ति सन्देहः। एतादृशं पुत्रं प्राप्तवती भवती महापुण्यशालिनी।'

'आयुः, स्वास्थ्यं च कथमस्ति?'

'स्वास्थ्यम् अत्युत्तममस्ति।'

'आयुः?'

बहुकालं यावत् परिशील्य अन्ते ते अवदन्, 'अम्ब, अष्टमे वयसि एकं कण्टकम् अस्ति। तदनन्तरं नास्ति चिन्ता।'

'तस्मात् बहिरायाति खलु?'



इतोऽपि कूलङ्कषरूपेण गणनां कृत्वा ते अवदन् : 'एतेन महाकार्याणि साध्यन्ते। अतः बहिरागच्छेदेव।'

'मया करणीयं जपः पूजा इत्येवं किमपि अस्ति चेत् वदन्तु।'

'अम्ब! एनं कण्टकात् रक्षितुं देवताः एव जपं कुर्वन्ति। भवती चिन्ताम् अकृत्वा भगवतः उपरि भारं निधाय तूष्णीं भवतु' इत्यवदन् दैवज्ञाः।

तस्मिन् समये प्रत्यागतस्य शङ्करस्य कर्णकुहरे एतानि वचनानि अपतन्। गृहं प्रविशन् एव सः प्रवरपुरस्सरं ब्राह्मणान् नमस्कृतवान्।

'भवतु, भवतु, पर्याप्तम्' इति वदन्तः ते पादान् आकृष्टवन्तः। अनन्तरं शास्त्रविचारान् चर्चितवन्तः। अन्ते तत्रैव भोजनं कृत्वा धन्यताभावेन प्रतिनिवृत्ताः।

आर्याम्बायाः मुखे उत्साहः नास्ति; चिन्ता दुःखं च आवृतमस्ति। एकान्ते नेत्राम्बु, पुत्रस्य पुरतः समाधानेन भवितुं प्रयत्नं करोति, किन्तु पूर्ववत् न भाषते।

एकदा शङ्करः अपृच्छत् : 'भवती किमपि दुःखम् अनुभवति, चिन्तां करोति, किं वदतु।'

'किमपि नास्ति रे।'

'गोपनं किमर्थम्? वदतु।'

'........'

'अम्ब! शरीरं शाश्वतं न। पितुः मरणेन इदं स्पष्टम्। किन्तु श्राद्धकर्म तु कुर्वन्तः स्मः खलु? तत् कस्य कृते कुर्मः? पितुः आत्मनः कृते खलु? इत्युक्ते शरीरं त्यक्तं चेदपि पिता न मृतः इत्येव खलु? मरणं शरीरधर्मः, आत्मधर्मः न। अतः भवती किमर्थं दुःखं करोति?'

आर्याम्बा एतानि वचनानि श्रावं श्रावं रोदिति स्म। काले गच्छति सति तस्याः उत्साहः न्यूनः जायमानः अस्ति। जीवनं यान्त्रिकरूपेण चलति। एकस्मिन् दिने शङ्करः मातुः सकाशे उपविश्य 'मया एकः विषयः प्रष्टव्यः। पृच्छानि किम्?' इत्यवदत्।

'पृच्छतु भोः।'

'दैवज्ञानां कथनानुसारम् एतत् शरीरम् अवसितं चेत् पितुः श्राद्धकर्तारः अपि न भवन्ति, मम श्राद्धकर्तारः अपि न भवन्ति। कर्मलोपः भवति। तत् असाधु। तत् भवती अपि जानात्येव।'

'........'

'तदर्थं शास्त्रसम्मतः एकः मार्गः अस्ति। वदानि किम्?'

'........'

'अग्रिमश्राद्धकर्मणाम् अपकर्षणं कृत्वा, अधुना एककालमेव कर्तुं शक्यते। तदा कर्मलोपः न भवति।'

'इत्युक्ते?'

'इत्युक्ते, मया संन्यासः स्वीकर्तव्यः। तत् भवत्याः अनुमतिं विना न शक्यते।'

हिक्कासहितं रोदनमेव अस्य वचनस्य आर्याम्बायाः उत्तरमभवत्।

'वृथा रोदनेन किं भवति? विचिन्त्य वदतु।'

सा किमपि नोक्तवती एव। उत्थाय अन्तः गतवती। तदा तदा शङ्करेण 'चिन्तितं किम्?' इति पृष्टं चेदपि उत्तरं नास्ति। तथैव दिनानि गतानि।

एकदा 'शङ्कर! स्नानार्थं गन्तव्यम्। आर्द्रवस्त्राणि वोढुम् अहं न शक्नोमि। अन्येषां हस्ते दानमपि समीचीनं न भवति। स्नात्वा भवानेव आनयतु, आगच्छतु' इत्यवदत् माता।

शङ्करः वस्त्राणां ग्रन्थिम् ऊढ्वा तस्याः पृष्ठतः प्रस्थितः। केचन शिष्याः अपि प्रस्थितवन्तः। नद्यां बहवः जनाः। बालकाः जले उत्प्लुत्य तरणं कुर्वन्तः सन्ति। ज्येष्ठाः स्नानं कृत्वा अनुष्ठानरताः। एकत्र रजकाः वस्त्राणि प्रक्षालयन्तः सन्ति। नद्याः अपरस्मिन् तटे धीवराः मत्स्यान् गृह्णन्तः सन्ति। कश्चन आनन्दः। अत्र आर्याम्बा शाटिकाः निष्पीड्य स्थापयन्ती अस्ति। 'अम्ब.. अम्ब.' इति झटित्येव शङ्करस्य उच्चैः क्रन्दनम्। सर्वे स्वीयकार्याणि परित्यज्य तत्र अपश्यन्। 'मकरः मम पादं गृहीतवान्। संन्यासार्थम् अनुमतिं ददातु, शीघ्रं ददातु।'

'अये! मम पुत्रं रक्षन्तु।'

'अम्ब! शीघ्रम् अनुमतिं ददातु।'

'भोः! किमपि वा करोतु' इत्युक्त्वा प्रज्ञाहीनस्थितौ आर्याम्बा अपतत्। शङ्करः 'ओं भूः संन्यस्तं मया, ओं भुवः संन्यस्तं मया, ओं सुवः संन्यस्तं मया' इति उच्चैः अवदत्। 'ओं भूः स्वाहा' इति उपवीतं छित्त्वा जले अक्षिपत्। इत्थं प्रवर्तमाने सति रजकाः रज्जुरूपेण वेष्टिं शङ्करस्य कटौ बद्ध्वा तटं प्रति कर्षन्ति स्म। तस्मात् तटात् धीवराः कुन्तान् गृहीत्वा नौकया झटिति आगताः। कुन्तैः मकरं विद्धवन्तः। केचन पाषाणखण्डान् क्षिप्तवन्तः। स्वल्पेनैव कालेन मकरः मरणं प्राप्य उत्तानतया प्लवमानः आसीत्। मकरात् रक्षितं शङ्करं जनाः तटं प्रति आनीतवन्तः । प्रज्ञाहीनस्थितौ



पतिताम् आर्याम्बाम् 'अम्ब! शङ्करः रक्षितः, मकरः मृतः। उत्तिष्ठतु, उत्तिष्ठतु' इति उत्थापितवन्तः। उत्थाय स्खलद्गत्या गच्छन्ती सा पुत्रम् आलिङ्गितवती। बालशङ्करः स्थिरतया स्थितवान् आसीत्। मकरेण दष्टे स्थले रक्तं स्रवति स्म । एकः धीवरः धावन् गत्वा किमपि हरितकम् आनीय निष्पीड्य रसं लेपितवान्। रक्तस्रावः स्थगितः। माता, 'अलं कष्टेन, इतःपरं भवान् स्नानार्थम् अत्र न आगच्छतु। गृहं गच्छाव, आगच्छतु' इत्यवदत्। शङ्करः स्थिरतया आसीत्।

'आगच्छतु भोः! गच्छाव।'

'........'

सः चलितुं न शक्नोति इति विचिन्त्य धीवरवैद्यः बालशङ्करं ग्रहीतुं प्रायतत।

'मास्तु, त्यजतु। अहं चलितुं शक्नोमि।'

'तर्हि किम्? आगच्छतु, गच्छाव' इत्यवदत् माता।

'अहमधुना संन्यासी, मया तथा न आगन्तव्यम्।' माता दिग्भ्रान्ता अभवत्। वदनात् वाक् एव न निःसृता। पार्श्वे स्थितः कश्चन वृद्धः अवदत् : 'अष्टवर्षीयः बालः भवान्, संन्यासः इत्युक्ते कः रे अर्थः!'

अन्यः अवदत् : 'संन्यासस्तु अस्ति केवलं जीवनं निर्वोढुम् अशक्तेभ्यः पङ्गुभ्यः अन्धेभ्यश्च। भवतः किमर्थं भोः संन्यासः, गृहमस्ति, भूयसी वाटिका अपि अस्ति।'

अपरः कश्चन वृद्धः अवदत् : 'मम मते तु, संन्यासः स्वीकर्तव्यः चेदपि तस्य एकः क्रमः नास्ति वा? आदौ गृहस्थः भवेत्, षष्टिवयसः अनन्तरं वानप्रस्थः भवेत्, अन्तिमे खलु संन्यासः? जनिं प्राप्ते सत्येव कोऽपि संन्यासं स्वीकरोति वा?'

शङ्करः तैः सह वादं न अकरोत्। अन्ते कश्चित् अवदत् : 'किमिदं भोः अन्याय्यम्! मातरम् एकाकिनीं त्यक्त्वा भवतः गमनं न्याय्यं किम्? भवान् एव वदतु। मातृदेवो भव, पितृदेवो भव इति भवानेव वदति खलु। भवतः पिता दिवङ्गतः। या भवन्तं कष्टेन पालितवती तां विधवां मातरम् एव विस्मरति किम्? चिन्तयतु।'

मौनेन स्थितं शङ्करं दृष्ट्वा आर्याम्बा अवदत् : 'तथा न करोतु भोः। एतेषां ज्येष्ठानां वचनं शृणोतु। आगच्छतु, गृहं गच्छावः।'

'अम्ब! भवत्याः अनुमतिं स्वीकृत्य अहं संन्यासी जातः। मातः! सर्वेषां पुरतः पञ्चभूतानां साक्षितया संन्यासं स्वीकृतवतः मम अधुना गृहं प्रति निवर्तनं धर्मः न।'

'अये! अये!' इति आर्याम्बा क्रन्दितवती। शङ्करः अचलतया स्थितवान् आसीत्। बहवः ज्येष्ठाः प्रयत्नं कृतवन्तः। वृद्धाः स्वैः ज्ञातं शास्त्रम् वदन्तः संन्यासार्थम्

असम्मतिं सूचितवन्तः। स्त्रियः रुदितवत्यः। सुहृदः बालाः दुःखिताः। अन्ते शङ्करः अवदत् – 'अम्ब! संन्यासस्वीकारानन्तरं गृहं प्रति निवर्तनं धर्मः न।'

'तर्हि अहम् एकाकिनी एव गृहे मरणं प्राप्नोमि चेदपि भवान् नागच्छति वा?'

'अम्ब! समाधानतया शृणोतु। अहमधुना संन्यासी। प्रतिनिवर्तनं दोषाय। भवती एकाकिनी तु न भवति। बन्धवः सन्ति, विद्यार्थिनः अपि गृहम् आगत्य भवत्याः योगक्षेमं पश्यन्ति। भवत्याः कापि समस्या न भवति। अहं भवत्यै प्रतिश्रुतिं ददामि; अन्तिमे घट्टे अवश्यमेव अहं भवत्याः निकटम् आगमिष्यामि। मह्यम् आशीर्वादं करोतु' इति शङ्करः साष्टाङ्गं नमस्कृतवान्। उत्थाय परावृत्य अदृष्ट्वा तटात् निष्क्रम्य कृष्णमूर्तिं नमस्कृत्य प्रस्थितवान् एव। वृद्धाः सर्वे क्रुद्धाः अभवन्।

## २. ओङ्कारेश्वरं प्रति

गमनं कुत्र? काननेषु, गिरिगह्वरेषु, गुहासु, नदीतीरेषु । किमर्थम्? सद्गुरुं द्रष्टुम्। तदा तदा कदाचित् दृश्यमानान् वनवासिनः, धीवरान्, यात्रार्थिनः च विहाय अस्य मार्गे अन्येषां सत्तायाः चिह्नं नास्ति। गुरोः अन्वेषणं बहुधा प्रचलति। 'अत्र कोऽपि महापुरुषः सिद्धपुरुषः वा अस्ति किम्?' इति सः यत्र पृच्छति तत्र सर्वत्र जनाः तस्मात् दूरस्थम् अन्यदेव स्थलं दर्शयन्ति स्म। अग्रे समुद्रतीरस्य मङ्गलूरुप्रान्तस्य समतलप्रदेशः। अपराह्णस्य आतपः। उदरार्थं किमपि प्राप्तं वा न वा, श्रान्त्या शङ्करः अपतत्। पार्श्वस्थात् मण्डपात् धीवराः धावन्तः समागताः। जलं पायितवन्तः। 'महती बुभुक्षा' इत्यवदत् शङ्करः । धीवराः क्षीरं दत्तवन्तः। पादं दृष्ट्वा, 'अयं कः व्रणः?' इति अपृच्छन्। 'मकरेण दष्टम्' इति सः अवदत्। 'भवन्तः सुखेन जीवन्तु' इति तेभ्यः आशीर्वादं कृत्वा अग्रे गतवान् शङ्करः। ततः शृङ्गगिरिं प्रति आगतः। ग्रामे भिक्षाटनं कृत्वा भुक्तवान्। विश्रान्त्यर्थं किञ्चित्कालं तुङ्गातीरे उपाविशत्। तत्र एकं विस्मयकरं दृश्यम् अपश्यत्। प्रखरातपयुक्ते अपराह्णे एकस्याः शिलायाः अधः अण्डप्रसवोन्मुख्यै एकस्यै मण्डूक्यै छायां प्रयच्छन् एकः कृष्णसर्पः छत्रमिव फणाम् प्रसारितवान् आसीत्। शृङ्गेरी अत्यन्तं पवित्रं स्थलमिति निश्चयम् अकरोत् शङ्करः। किन्तु गुरुः न प्राप्तः। 'तद्विज्ञानार्थं गुरुमेवाभिगच्छेत्' इति श्रुतिवाक्यं स्मृत्वा गुरोः प्राप्तिपर्यन्तमपि अविश्रान्ततया अन्वेषणस्य सङ्कल्पम् अकरोत्। ततः कश्चित् तं मूकाम्बिकाक्षेत्रं प्रति प्रेषितवान्। तत्र भगवत्याः दर्शनं जातं, किन्तु गुरुदर्शनं न



जातम्। पद्भ्यां सञ्चरन् एव अन्ते नर्मदातीरपर्यन्तमपि आगतः। तत्र पृष्टः कश्चित् जनः अवदत्, 'ओङ्कारेश्वरे महान् सिद्धपुरुषः कश्चित् अस्ति, वृद्धः। गोविन्दः इति तस्य नाम। सर्वेभ्यः प्रदेशेभ्यः आगताः यात्रार्थिनः तस्य दर्शनं कृत्वा एव गच्छन्ति।' सः तत्र गमनमार्गं प्रादर्शयत्। शङ्करः तत्र प्रस्थितः। दूरे रज्ज्वाः उपरि प्रसारितानि काषायवस्त्राणि गुरुस्थानं प्रदर्श्य शङ्करम् आह्वयन्ति 'पट पट' इति शब्दं कुर्वन्ति स्म। सः नर्मदायां स्नात्वा गुरुदर्शनार्थं प्रस्थितः।

तत्र एका गुहा। समीपे कोऽपि नास्ति। प्रायः शिष्याः भिक्षार्थं गतवन्तः स्युः। शङ्करः अवनम्य गुहाम् अपश्यत्। बद्धपद्मासने नेत्रे निमील्य उपविष्टस्य गोविन्दस्य मुखं पश्यन् एव स्वस्य लक्ष्यं पूर्णम् अभवत् इति सन्तृप्तः अभवत्। नमस्कारम् अकृत्वा तत्रैव बहिः प्रतीक्षमाणः उपाविशत्।[1] शिष्याः भिक्षाम् आनीतवन्तः। उत्थाय गत्वा शङ्करः तेषु अन्यतमं कञ्चन ज्येष्ठं नमस्कृतवान्। सः 'किम् आवश्यकम्?' इति अपृच्छत्।

'गुरूणां दर्शनार्थम् आगतोऽस्मि।'

'अधुना ते समाधौ सन्ति, तान् द्रष्टुं न शक्यते।'

'तदर्थमेव अत्र प्रतीक्षमाणः उपविष्टोऽस्मि।'

'भोजनं कृतं किम्?'

'न।'

भिक्षां पर्णे संस्थाप्य 'खादतु' इत्यवदत् सः।

'न, तेषां दर्शनं यावत् किमपि न खादामि।'

'तेषाम् उत्थानसमयस्य निश्चयः नास्ति।'

'कदा वा उत्तिष्ठन्तु, तावत्पर्यन्तं प्रतीक्षां करोमि, चिन्ता नास्ति।'

गोविन्दगुरवः तस्मिन् दिने न जागरिताः। परेद्यवि अपि न जागरिताः। तृतीये दिने बहिर्मुखाः अभवन्। शङ्करः आगतवान् इति शिष्याः असूचयन्। ततः अनुमतिप्राप्तेः अनन्तरं शङ्करः गुहां प्राविशत्। 'न कर्मणा न प्रजया' मन्त्रम् उक्त्वा साष्टाङ्गं नमस्कृत्य, उत्थाय हस्तौ संयोज्य अतिष्ठत् च। गुरवः अत्यन्तं करुणया 'हे बालक, भवान् दिनद्वयात् निराहारः अस्ति इति ज्ञातम्। आदौ भोजनं करोतु। अनन्तरं सम्भाषणं करवाव' इत्यवदन्। क्लृप्ततया भुक्त्वा तेषां निकटं गत्वा हस्तौ संयोज्य

---

१. समित्पुष्पकुशाग्न्यम्बुमृदन्नाक्षतपाणिकः। जपं होमं च कुर्वाणो नाभिवाद्येत वै द्विजम् ।।
- स्मृतिः

अतिष्ठत् शङ्करः।

‘नितरां श्रान्तः अस्ति, उपविशतु । भवतः नाम किम्?’

‘शङ्करः इति वदन्ति।’

‘कः ग्रामः?’

‘केरलदेशे कालटी इति ग्रामः।’

‘उपनयनं नाभवत् वा?’

‘अभवत्। अधुना चतुर्भ्यः मासेभ्यः पूर्वम् आपत्संन्यासं स्वीकृतवान्। तदा यज्ञोपवीतं नद्यां क्षिप्तवान्।’

गुरवः बद्धभ्रुकुटीकाः अभवन्। ‘अतः एव भवान् समित्संस्थापनं विना एव नमस्कृतवान् वा?’ इत्यपृच्छन्।

‘आम्।’

‘आपत्संन्यासः किमर्थं स्वीकरणीयः अभवत्?’

शङ्करः प्रवृत्तं सर्वं विस्तरेण निवेदितवान्।

‘उपनयनं कदा अभवत्?’

‘तृतीये वर्षे।’

‘अनन्तरं गुरुकुलं गतवान् किम्?’

‘आम्।’

‘गुरुकुले कियत्कालम् आसीत्?’

‘सार्धैकवर्षम् आसम्।’

‘तत्र किम् अधीतवान्?’

‘वेदाध्ययनम् अकरवम्।’

‘कः वेदः?’

‘चत्वारः वेदाः अधीताः।’

एतत् श्रुते सत्येव परितः उपविष्टानां शिष्याणां मुखम् उद्घाटितम्।

‘इतोऽपि किम् अधीतवान्?’

‘षडङ्गानि अधीतानि, किञ्चित् व्याकरणम् अपि अधीतम्।’

‘पूर्वमीमांसा?’

‘नाधीता।’

गुरवः वेदेषु तत्र तत्र मन्त्रान् अपृच्छन्। षडङ्गेषु प्रश्नान् अपृच्छन्। व्याकरणे



MahaParivrajaka

अपृच्छन्। शङ्करः सर्वस्यापि समुचितानि उत्तराणि प्रायच्छत्। शिष्याः दिङ्मूढाः अभवन्। अयं बालकः असामान्यः इति गोविन्दगुरुभिः अवगतम्। एतादृशे कोमले वयसि कियत् पाण्डित्यम् ! कियान् उज्ज्वलनिश्चयः! अयं धर्मोद्धारार्थमेव अवतरणम् कृतवानस्ति। अस्मै समीचीनतया शिक्षा प्रदेया इति ते निश्चितवन्तः। स्वल्पसमयानन्तरं ‘क्रमसंन्यासः भवतु, अधुना गायत्र्युपासनां कुर्वन् भवतु। मार्जनप्राशनादिकर्मणः आवश्यकता नास्ति। अर्घ्यं प्रदाय उपासनायाः आरम्भं करोतु। अधुना गच्छतु। निर्मलचैतन्य ! शङ्करस्य वासार्थम् एकस्य स्थलस्य व्यवस्थां करोतु’ इति एकं शिष्यं संसूच्य शङ्करं प्रेषितवन्तः।

शङ्करः स्वस्य वयसः अनुरूपाः लघुसेवाः करोति स्म। भिक्षार्थं गच्छति स्म। एतद्विहाय अन्यस्मिन् समये गायत्र्युपासना एव। बहुवारं बाह्यप्रज्ञाराहित्येनैव उपविशति स्म। तदा गुरवः एव तम् उत्थाप्य प्रेषयन्ति स्म। एकस्मिन् दिने गुरवः आहूतवन्तः। शङ्करः गत्वा नमस्कृत्य उपविष्टवान्।

‘जीवैः युक्तस्य अस्य समग्रजगतः सृष्टिक्रमं वदामि, शृणोतु’

इति उपदेशम् आरभन्त गुरवः।

‘इदं जगत् सृष्टिस्थितिलयानां चक्रे अन्तर्भूतमस्ति। इदं चक्रम् अनादिकालात् अनन्तकालं यावत् भ्रमत् भवति। अस्याः सृष्टेः पूर्वं केवलं ब्रह्म आसीत्। तत् चेतनम्। वर्णनातिरिक्तं सूक्ष्मम्। किन्तु वटबीजे यथा सूक्ष्मरूपेण महान् वटवृक्षः एव भवति तथा तस्मिन् जगत् अन्तर्भूतमस्ति। जलात् जायमानं हिमं हिमरूपप्राप्तेः पूर्वं जले जलरूपेण एव यथा भवति तथा जगत् सृष्टेः पूर्वं ब्रह्मणि ब्रह्मरूपेण एव भवति। इयमेव ब्रह्मशक्तिः। इमाम् अपरा प्रकृतिः इति वदन्ति। अग्रे इयमेव जगद्रूपं प्राप्नोति। जगति विद्यमानस्य व्यवहारस्य कारणीभूतः ब्रह्मणः क्रियाशक्तिरूपः प्राणः। ब्रह्मणि सर्जनाभिलाषे उद्भूते सति अस्य प्राणबलस्य आधारेण अपराप्रकृतितः महत्तत्वम्, तस्मात् अहङ्कारतत्त्वम्, तस्मात् शब्दस्पर्शरूप-रसगन्धतन्मात्राणि अपि बहिरायान्ति। एतानि सप्त तत्त्वानि अपराप्रकृत्या सह संयोज्य अष्टधाप्रकृतिः इति वदन्ति।’

‘तन्मात्रम् इत्युक्ते किम्?’

‘तन्मात्रम् इत्युक्ते केवलम् एकेनैव गुणेन युक्तम्। केवलं शब्दगुणयुतं शब्दतन्मात्रम्। तद्वदेव अन्यानि तन्मात्राणि अपि। इतःपरं जायमाना सृष्टिः, सम्यक् विचिन्त्य निश्चित्य क्रियमाणं कार्यम्। तदर्थं बुद्धिः, मनः च आवश्यकम्। तत् मनः अत्यन्तं निर्मलं, सा बुद्धिः अतिसूक्ष्मा दृढा च भवेत्। ते, अस्माकं मनोबुद्धी इव चाञ्चल्येन

भ्रमणशीले अस्थिरे च न भवेताम्। परमात्मनः सङ्कल्पानुगुणं महतः तादृशी बुद्धिः, अहङ्कारात् तादृशं मनः च जन्म प्राप्नोति। एतेन सह दृश्यमानः चेतनः एव हिरण्यगर्भः। अयं पूर्वतनसृष्टिभूतः महातपस्वी, महायोगी च। तपसि योगेषु च अस्य समानाः, अस्य अतिशायिनः वा अन्ये न सन्ति। जगतः सृष्टिकार्यं स्वयमेव निर्वोढव्यम् इति इच्छया पूर्वतनसृष्टौ अयं महत् तपः आचरितवान् आसीत्। तस्य फलतया परमात्मनः आज्ञया अधुना तत् स्थानं प्राप्नोति।'

'तथा चेत् अयमेव प्रथमजीवी वा?'

'आम्। किन्तु अस्माकमिव तस्य स्थूलशरीरं नास्ति। अनेन पञ्चमहाभूतानां सृष्टिक्रमः इत्थम् : पञ्चतन्मात्रराशेः शब्दतन्मात्रस्य कर्षणे कृते सति प्राणात् तस्य स्पन्दनानि कार्यगतानि भूत्वा शब्दगुणयुक्तेन आकाशमहाभूतरूपेण दृश्यन्ते। तस्मात् स्पर्शतन्मात्रं कर्षति। तस्य स्पन्दनानि कार्यगतानि भूत्वा शब्दस्पर्शगुणाभ्यां युक्तं वायुमहाभूतं जायते। तथैव तस्मात् रूपतन्मात्रस्य कर्षणे कृते सति शब्दस्पर्शरूपैः युक्तं तेजः, तस्मात् शब्दस्पर्शरूपरसयुक्तं जलं, तस्मात् शब्दस्पर्शरूपरसगन्धवती पृथिवी च जायते। पञ्चतन्मात्रैः एतेषां पञ्चमहाभूतानाम् अमुं सृष्टिक्रमं पञ्चीकरणम् इति वदन्ति। पूर्वं मनसः बुद्धेश्च सृष्टौ जातायां सत्यां ताभ्यां द्वारा हिरण्यगर्भः यथा दृष्टः, तथा एतैः पञ्चमहाभूतैः सह जनिं प्राप्नुवन् चेतनः प्रजापतिः। एतदतिरिक्तायाः सृष्टेः निर्वाहकः अयम्।

तदर्थम् अयं तेजोजलपृथिवीमहाभूतानि एकेन क्रमेण मेलयति। एतेषु त्रिषु तेजः प्रधानतया, अवशिष्टद्वयं विविधैः परिमाणैः स्वल्परूपेण मिश्रीकृत्य ग्रथ्नाति। तदा नैकविधानि असङ्ख्यानि तेजांसि सञ्जायन्ते। उदाहरणार्थं सूर्यः, चन्द्रः, अग्निः, सौदामनी इत्यादीनि एतादृशानि तेजांसि। तद्वदेव जलं प्रधानतया, अवशिष्टद्वयं विविधैः परिमाणैः स्वल्परूपेण मिश्रीकृत्य ग्रथिते सति जलं, क्षीरं, फलरसाः इत्यादीनि असङ्ख्यानि जलानि सञ्जायन्ते। तद्वदेव रक्तमृत्तिका, कृष्णमृत्तिका, वज्राणि इत्याद्याः असङ्ख्याः पृथिव्यः च सञ्जायन्ते। अयं मेलनक्रमः त्रिवृत्करणम् इति उच्यते। एतानि सर्वाणि असङ्ख्यानां देवतानां स्थानानि। एवंरूपेण सृष्टस्य सूर्यतेजसः, वृष्टिजलस्य, पृथिव्याः च पुनः मिश्रणेन सस्यानि, वृक्षाः, लताः च जायन्ते। एतेषु विद्यमानस्य तेजसः, जलस्य, पृथिव्याः च मिश्रणेन प्राणिनां शरीराणि जायन्ते। आरम्भे ये जायन्ते ते साक्षात् भूम्याः एव जनिं प्राप्नुवन्ति। अतः तान् अयोनिजाः, ब्रह्ममानसपुत्राः, ब्रह्ममानसपुत्र्यः इति च वदन्ति। मनुः, शतरूपा,



मरीच्यादिसप्तर्षयः, सनकादयः, कर्दमः इत्यादिप्रजापतयः अपि एवमेव जनिं प्राप्तवन्तः। एते सर्वेऽपि पूर्वतनसृष्टिस्थाः महान्तः सिद्धपुरुषाः। स्वेषां तपसः फलतया सृष्टेः आरम्भे जनिं प्राप्नुवन्ति। यतो हि अग्रे जनिं प्राप्नुवतां प्रजानाम् एते मार्गदर्शकाः। अनन्तरं मनोः शतरूपायाश्च पुत्रपौत्रादयो भूत्वा अन्ये जनिं प्राप्नुवन्ति। अतः इमे सर्वे मानवाः। तस्य अनन्तरं मनुः शतरूपा च स्वयोगशक्त्या अन्येषां प्राणिनां रूपाणि धृत्वा तत्तत्प्राणिनां सृष्टये कारणं भवतः।'

शङ्करः अपृच्छत् : 'सृष्ट्यादेः कर्ता परमेश्वरः इति अश्रौषम्। सः कः? ब्रह्मणः तस्य च कः सम्बन्धः?'

गुरवः अवदन् : 'पराप्रकृतिः अपराप्रकृतिः च ब्रह्मशक्ती इति उक्तवान् खलु, तयोः द्वारा अभिज्ञायमानं ब्रह्म, ईश्वरः इति वदन्ति। उदाहरणार्थं, स्वर्णाङ्गुलीयकस्य आकारोऽपि स्वर्णमेव। आकारद्वारा अभिज्ञायमानं स्वर्णम् अङ्गुलीयकम् इति वदामः खलु! तद्वदेव अत्रापि।'

'जगत्सृष्टिः किमर्थं भवति?'

'जीवानां कर्मार्थं भोगार्थं च भवति। जगत् नास्ति चेत् ते कर्म अपि कर्तुं न प्रभवन्ति, भोगः अपि असाध्यः। अतः सृष्टिं करोति।'

गुरुभिः कृतस्य अस्य उद्बोधनस्य आधारेण शङ्करः तैत्तिरीयोपनिषदं, छान्दोग्योपनिषदं च गभीरतया अधीतवान्। विविधासु उपनिषत्सु विविधरूपेण सृष्टिक्रमः प्रोक्तः इति कारणेन सामान्यानां स्थूलावलोकनेन विरोधः दृश्यते। किन्तु कथञ्चिदपि विरोधः नास्तीति सः अवगतवान्।

सर्वेषां शिष्याणां गुरुसेवाकरणे उत्साहः। सर्वेभ्यः शिष्येभ्यः सेवां स्वीकर्तुं तावत्यः आवश्यकताः गुरूणां न आसन्। अतः तेषु, एकैकेन एकैकस्याः सेवायाः आचरणम् इति परस्परम् अङ्गीकृतमासीत्। एकस्मिन् दिने गुरुभ्यः भिक्षानयनकार्यं शङ्करस्य। सः भिक्षाम् आनीय गुरुभ्यः परिवेषणं कृत्वा तत् स्थलं स्वच्छीकृत्य अनन्तरं स्वयमपि भुक्तवान्। बहिः गत्वा गुरुभिः उक्तानां वाक्यानां मननं कुर्वन् नर्मदातटे बहुकालं यावत् भ्रमन् आसीत्। चिन्तने तीव्रे जाते सति नदीतटस्थायाः एकस्याः शिलायाः उपरि सः उपाविशत्। तस्य क्व मूलं स्यात् अन्यत्रान्नात्? अन्नेन शुङ्गेन आपोमूलमन्विच्छ, अद्भिः शुङ्गेन तेजोमूलमन्विच्छ, तेजसा शुङ्गेन सन्मूलमन्विच्छ – अस्य शरीरस्य अन्नात् अन्यत् किं कारणं स्यात्? अन्नेन कार्येण जलमूलम् अन्विष्यतु, जलेन कार्येण तेजोमूलम् अन्विष्यतु, तेजोमूलेन

Maha Parivrajaka

सन्मूलम् अन्विष्यतु' इति छान्दोग्यवाक्यं स्मृतं सत् चिन्तनार्थम् अवसरं प्रायच्छत्। 'इदं शरीरम् आगतम् अन्नात्। तर्हि, अन्नं शरीरस्य सारः इति अभवत्। तथैव जलम् अन्नस्य सारः, तेजः जलस्य सारः' इति तस्य मनः शरीरस्य पूर्वतनकारणानि प्रति गतम्। इत्थं गच्छति सति पञ्चभूतशरीरात्मके प्रजापतौ स्थगितम्। तत्र पितृलोकः, स्वर्गादिदेवलोकाः, इन्द्रलोकः इत्यादयः दृष्टाः। ततः प्रजापतेः मूलस्य हिरण्यगर्भस्य सकाशं गतम्। तत्र अवर्णनीयानि दृश्यानि दृष्टानि।

'अहो! किमेतौ? एतौ समुद्रौ कौ?'

'अरः, ण्यः च।'

'किमाश्चर्यम्! किमिदं सरः?'

'ऐरयदीयम् – अन्नस्य सारः। अस्य सेवनं क्रियते चेत् महान् हर्षः।'

'कोऽयम् अश्वत्थः?'

'अमृतस्रावकः वृक्षः।'

'तर्हि अयं ब्रह्मलोकः किम्!'

'आम्।'

'कोऽयं स्वर्णमण्डपः?'

'अयं प्रभुणा निर्मितः।'

'एतत् सर्वं किम्?'

'भवान् एव पश्यतु।'

शङ्करः यतः शब्दः आगतः तत्र अपश्यत्। कोऽपि न दृष्टः। शब्दः कुतः आयातीति स्पष्टतया न ज्ञातम्। एतानि विचित्रदृश्यानि दृष्टवतः तस्य मनः विचलितम्। निमीलिते नेत्रे उन्मीलिते। पुरस्तात् चिरपरिचिता नर्मदा! एतावत्पर्यन्तं दृष्टं सर्वम् अर्धक्षणेनैव अदृश्यतां गतम्। पुनः चिन्तनस्य आरम्भः।

'मया एतावत्पर्यन्तं यत् दृष्टं तत् स्वप्नः उत सत्यम्?'

'स्वप्नसत्ययोर्मध्ये कं भेदम् अपश्यम्?'

'जागरणमनु यत् नष्टं भवति स एव स्वप्नलोकः। पुनः दर्शनस्य विश्वासः नास्ति। किन्तु जाग्रदवस्थायाः जगत् तथा न, पूर्वेद्युः दृष्टमेव पुनः दृश्यते। पूर्वेद्युः अर्धे स्थगितं कार्यमपि अद्य अनुवर्तयामः। अतः जाग्रज्जगत् सत्यम्!'

'स्वप्ने एव शयनं कृत्वा जागरितेषु सत्स्वपि इत्थमेव भवति। अतः तदपि इदमिव सत्यं खलु!'



'किन्तु स्वप्नलोकः जाग्रतः मानसप्रत्ययमात्रम्। तत् केवलं स्मरणम्। तत्र विषयः एव नास्ति।'

'तदपि सत्यमेव। किन्तु विषयः स्थूलः, तस्य मानसप्रत्ययश्च सूक्ष्मः इति एतावदेव विषयस्य, तस्य स्मरणस्य च भेदः। स्थूलविषयः वा स्वप्नविषयः वा भोगदृष्टौ तु एकः एव, भेदः नास्ति। भोजनं स्वप्ने जाग्रदवस्थायां वा कृतं चेदपि तृप्तिः समाना एव खलु! हिरण्यगर्भः मानसलोकैः एव सन्तुष्टः भवति, सः सूक्ष्मभोगी। जीवाः स्थूलभोगिनः, तेषां कृते स्थूलं जगत्।'

एतदनन्तरं चिन्तनम् अन्यस्मिन् मार्गे गतम्। प्रश्नानां प्रष्टा अहम्। तेषाम् उत्तराणि आगच्छन्ति। केभ्यः आगच्छन्ति? मत्तः एव आगच्छन्ति किम्? मत्तः एव आगच्छन्ति चेत् मयि प्रश्नाः एव न उद्भवेयुः खलु! 'प्रश्नः – उत्तरम्' अस्य उभयस्यापि एकस्मिन् एव भवनं साध्यं किम्?.... असाध्यम्... अथवा, उत्तराणि बहिस्तात् आयान्ति वा?..... तथा तु न, अन्तःस्तात् एव आयान्ति । तर्हि मत्तः अन्यस्मात् एव उत्तराणि आगच्छन्ति स्युः। सः मयि एव भवेत् । इतरैः अपि तेषां प्रश्नानाम् उत्तराणि प्राप्यन्ते खलु!..... सः प्रायः सर्वेषु स्यात्। अतः सर्वेषां प्रश्नानाम् उत्तरदाता सः सर्वज्ञः एव स्यात्। सः कः? हिरण्यगर्भः वा?..... सोऽपि स्यात्। किन्तु सोऽपि जनिं प्राप्तः एव खलु! सर्वेभ्यः आदौ जनिं प्राप्तः, तावदेव । अतः सर्वज्ञः साक्षी, तस्यापि साक्षी स्यात् इति जातम्। तर्हि तस्य सन्देहाः न भवेयुः। किमर्थं न भवेयुः?...... मयि सन्देहभवनमेव मत्तः अन्यस्य कस्यचन विषये खलु! ...... आम् । तर्हि तस्य सन्देहाः न भवन्ति इत्यस्य कारणं किम्? ...... हाँ.. ज्ञातम्। तस्य स्वस्यापेक्षया अन्यदिति नास्ति, सर्वमपि सः एव। सर्वमपि सः एव इति विद्यमानस्य तस्य कस्य विषये सन्देहः भवति! ...... यावत्पर्यन्तं शरीरे अहंममाभिमानः भवति तावत्पर्यन्तं स्वस्मात् अन्यत् बहु अस्ति। तेषां विषये संशयाः आगच्छन्तः एव भवन्ति। यदा, सम्पूर्णजगतः कारणं सः सर्वज्ञः एव अहम् इति ज्ञानम् उदेति तदा स्वस्मात् अन्यत् न किमपि भवति, संशयाः न भवन्त्येव। किमर्थम्? यस्य ज्ञानेन अश्रुतं सर्वं श्रुतं भवति, अमतं सर्वं मतं भवति, अज्ञातं सर्वं ज्ञातं भवति तदेव सः सर्वज्ञः – 'येन अश्रुतं श्रुतं भवति, अमतं मतं भवति, अविज्ञातं विज्ञातं भवति, तत् ब्रह्म।'

कतिपयदिनानन्तरं गुरवः अग्रिमं पाठनम् आरभन्त : 'गते पर्याये प्रोक्ते सृष्टिक्रमे उक्तम् एकं वचनं न विस्मर्तव्यमेव : ब्रह्मणः प्रस्थितं प्राणादिनामान्तं जगत् तथा

MahaParivrajaka

जीवाः, चापात् आगतः बाणः इव ब्रह्मणः पृथक् भूत्वा न आगताः। ब्रह्म सर्वेष्वपि समानतया अनुसरणं कृत्वा एव आगतम्। इदं न स्मर्यते चेत् 'सर्वं खल्विदं ब्रह्म' इति श्रुतिवचनस्य अवगमनं न भवति। यथा स्वर्णं स्वर्णशकले, तेन कृतेषु आभरणेषु च अनुगतं भवति तथा अनुगतमस्ति। एतदतिरिच्य मनुष्यशरीरे अपरोऽपि विशेषः अस्ति यत् तस्मिन् ब्रह्माण्डमपि अंशरूपेण अस्ति। ब्रह्माण्डतत्त्वानां मनुष्यशरीरे अवस्थितिक्रमं वदामि; जानातु' इति आरभन्त।

'गुदात् गलं यावत् व्याप्तं कशेरुमणीनां मालारूपं कशेरुकं मेरुः इति वदन्ति। तस्य वामभागे इडानाडी, दक्षिणे पिङ्गलानाडी, मध्ये च सुषुम्नानाडी च अस्ति। एतासां तिसृणां सङ्गमः भ्रुवोः मध्यभागे अस्ति। अपि च यत्र गुदद्वारे सुषुम्नानाडी आरभते तस्य समीपे मूलाधारचक्रम्, तस्य उपरि जननेन्द्रियस्य अधोभागे स्वाधिष्ठानचक्रम्, तस्य उपरि नाभेः अधः मणिपूरचक्रम्, तस्य उपरि हृदयस्य समीपे अनाहतचक्रम्, तस्य उपरि कण्ठस्य अधः विशुद्धचक्रम् - इत्येवं पञ्च चक्राणि सन्ति। एतेषु क्रमशः पृथ्वी, जलं, तेजः, वायुः, आकाशः इति पञ्चीकृतमहाभूतानि सन्ति। अनेनैव क्रमेण गन्धरसरूपस्पर्शशब्दतन्मात्रप्रधानानि त्रिवृत्कृतभूतानि सन्ति। घ्राणजिह्वाचक्षुस्त्वक्छ्रोत्रज्ञानेन्द्रियाणां शक्तिस्थानानि सन्ति। अनेनैव क्रमेण भूः, भुवः, सुवः, महः, जनः इति व्याहृतयः सन्ति; साकिनी, काकिनी, लाकिनी, राकिणी, डाकिनी इति व्यष्टिदेवताः, पञ्चमहाभूतानां समष्टिदेवताश्च सन्ति।

अस्योपरि विद्यमानम् आज्ञाचक्रं, विशुद्धचक्रस्योपरि ललाटस्य समीपे अस्ति। इदं पञ्चमहाभूतानां कारणीभूतायाः प्रकृतेः, शब्दस्पर्शरूपरसगन्धानां ग्रहणसामर्थ्य-युक्तस्य अन्तःकरणस्य, व्यष्टिदेवतायाः हाकिन्याः, समष्टिदेवतायाः हिरण्यगर्भस्य, तपोव्याहृतेः च स्थानमस्ति। अस्यापि उपरि सहस्रारचक्रं विद्यते। शिरसि अधोमुखं कमलरूपेण विद्यमानम् इदं चक्रं सत्यम् इति व्याहृतेः, याकिनी इति व्यष्टिदेवतायाः, ईश्वरस्य च स्थानमस्ति। अत्रत्यब्रह्मरन्ध्रद्वारा ईश्वरः देहं प्रविश्य जीवस्य जीवनाधारः भवति। स्पष्टतया अवगतं किम्?'

'चक्राणि dZÖस्थानानि इत्युक्ते कोऽर्थः?'

'पश्यतु, गन्धं जिघ्राति नासिका। अथापि आघ्राणनसमये श्वासकर्षकस्य अपानवायोः क्रियायाः बलं मूलाधारस्थयोः गुदगुह्ययोः विद्यते। अतः मूलाधारं पृथिवीभूतस्य गन्धस्य च स्थानम्। तथैव अन्यान्यपि।'



'व्याहृतिः इत्युक्ते किम्?'

'तत् देवतायाः नाम। व्याहृत्या आहूतं चेत् स्पन्दते; इत्युक्ते अनुगृह्णाति। व्याहृतिशब्दः तस्य स्वभावः अपि अस्ति। कथमिति चेत्, वस्तुनः स्वभावः तेन क्रियमाणेन शब्देन ज्ञायते। उदाहरणार्थं धान्यैः युक्तः कुसूलः। एकेन दण्डेन कुसूलस्य अधोभागात् उपरिभागं यावत् ताडयामश्चेत् धान्यानि कियता परिमाणेन सन्तीति ज्ञायते। नाडिरवं श्रुत्वा वैद्यः शरीरस्थं व्याधिम् अवगच्छति। तद्वदेव अत्र पश्यतु' इति आचमनदर्व्या कमण्डलुं ताडयित्वा अयं शब्दः 'ठिण्' इति खलु' इत्युक्त्वा 'ठिण्' शब्दम् उच्चारितवन्तः। उच्चारितः 'ठिण्' इति शब्दः एव कमण्डलोः शब्दः न चेदपि, तस्य समीपवर्ती अस्ति। तद्वदेव भूः शब्दः पृथ्वीतत्त्वस्य स्वरूपं सूचयति। अपि च मूलाधारस्थं पृथ्वीतत्त्वं, शरीरात् बहिः विद्यमानं पृथ्वीतत्त्वञ्च स्वरूपेण समानमेव इत्यतः तयोः व्याहृतिः स्वभावश्च समानः एव। किन्तु उपासकेन कथ्यमाना भूः व्याहृतिः पृथ्वीव्याहृत्या सह ऐक्यं न भजते। ऐक्यसाधने एकं दृष्टान्तं पश्यतु; स्वस्य ततस्य श्रुतिः शिक्षकस्य ततस्य श्रुत्या सह साम्यं न भजते चेत् तस्य तन्त्रीणां कर्षणाधिकं कृत्वा समीकरोति। तद्वदेव, स्वस्य व्याहृतेः पृथ्वीतत्त्वस्य व्याहृत्या सह ऐक्यार्थं स्वस्य प्रयत्नः अपेक्ष्यते। एतदर्थं पृथ्व्याः स्वरूपं, स्वस्य तस्य च सम्बन्धः गुरुमुखेन शास्त्रद्वारा अवगन्तव्यः। एवम् उपासनया स्वबुद्धौ देवतास्वरूपेण सह समानायां सत्यां देवताबुद्ध्यनुगुणम् उपासकस्य बुद्धिः प्रतिस्पन्दनं करोति। तदा अनेनापि देवताव्यवहारः साध्यः। अयमेव भूतजयः। उदाहरणार्थं, तपोव्याहृतिद्वारा आज्ञाचक्रस्य समष्टिबुद्धिदेवतायाः हिरण्यगर्भस्य उपासनं कृत्वा जायमानेन प्रतिस्पन्देन त्रिकालज्ञानं, सर्वेषां मनसः अवगमनसामर्थ्यं च जायते। किन्तु जागरूकेण भाव्यम्। सिद्धिविचारे व्यामोहः न करणीयः। केवलं धर्मरक्षणार्थम् अस्योपयोगः कर्तव्यः।'

परेद्यवि प्रातस्सन्ध्योपासनं समाप्य शङ्करः गुरुनिकटम् अगच्छत्। साष्टाङ्गं नमस्कृतवान्। गोविन्दभगवत्पादाः तस्य शिरसि हस्तं निधाय आशीर्वादम् अकुर्वन्। अनन्तरं शङ्करस्य साधना आरब्धा। इतरेभ्यः शिष्येभ्यः गुरवः अवदन् : 'भवन्तः एव तस्मै अपि भिक्षाम् आनीय तदर्थं रक्षन्तु। सः ध्याने अस्ति चेत् न उत्थापयन्तु। सः एव उत्थानानन्तरं खादतु।'

शङ्करः भिक्षार्थमपि न गच्छति स्म। प्रत्यहं नर्मदायां स्नात्वा पार्श्वस्थायां लघुगुहायां ध्यानार्थम् उपविशति स्म। कदाचित् बहिर्मुखः भवति स्म। अपराह्णे

जागर्ति चेत् भिक्षां भुनक्ति स्म। अन्यथा तदपि नास्ति। कदाचित् द्वित्राणि दिनान्येव उपविशति स्म। जाग्रदवस्थायां केनापि सह न भाषते स्म। अन्येषां शिष्याणां, स्वयमेव गत्वा तेन सह भाषितुं धैर्यमपि नासीत्। कतिपयदिनानन्तरम् एकदा भिक्षां दातुं शङ्करस्य गुहायां तेषु प्रविशत्सु एव अवर्ण्यस्य सुगन्धस्य अनुभवः अभवत्। गभीरे मन्दध्वनौ भूः इति शब्दः श्रूयते स्म। ते अवनम्य तस्य मुखम् अपश्यन्। अलौकिकं तेजः आसीत्। वदने चलनं तु नासीत्। शब्दः कुतः आयाति इति न ज्ञातम्। आनीतां भिक्षां प्रतिस्वीकृतवन्तः। शिष्याः धावन्तः गत्वा गुरून् सूचितवन्तः।

'तथा वा! तर्हि तेन पृथ्वीभूतं जितम्। तस्य साधनाविषये ग्रामस्थेषु न किमपि वक्तव्यम्। उक्तं चेत् दर्शनार्थमिति अत्र आगमिष्यन्ति। अत्र तस्य तपसः विघ्नः भवति' इत्यवदन्।

अनन्तरं शैत्यकालः। शङ्करः चतुर्भ्यः दिनेभ्यः नोत्थितवानेव। समाधिस्थितौ शिलामूर्तिः इव उपविष्टः एव अस्ति। शिष्यैः तस्य निमित्तं भिक्षाम् आनीय गुहाद्वारे स्थापनं प्रतिदिनं प्रचलति। सायङ्कालानन्तरं सर्वे शिष्याः प्रसादरूपेण एकैकं ग्रासं परस्परं वितीर्य खादन्ति स्म। 'शङ्करः अद्यापि नोत्थितवान्' इति गुरुभ्यः तेषां कथनं, गुरूणां 'तं न उत्थापयन्तु' इति च कथनं प्रतिदिनं प्रचलति। पञ्चमे दिने तस्य दर्शनोद्देशेन तेषु ज्येष्ठः शिष्यः धैर्येण गुहां प्राविशत्; एकस्मिन् पदे निक्षिप्ते सत्येव सोढुम् अशक्यः घर्मः तेन अनुभूतः। शैत्यकाले घर्मः भवतीति आश्चर्येण इतोऽपि एकं पदम् अग्रे गत्वा अवनम्य दृष्टे सति शङ्करस्य नाभेः अग्नेः स्फुलिङ्गाः उत्पतन्ति स्म। भीत्या धावन् सः गत्वा गुरुभ्यः विचारं सूचितवान्। गुरवः अवदन्–'भीत्याः अवसरः नास्ति। बहुशीघ्रं बहु साधितवान्। सः अधुना अग्नितत्त्वं जितवान् अस्ति। कथञ्चिदपि तस्य उपासनायाः भङ्गः यथा न स्यात् तथा पश्यन्तु। सद्यः तु तस्मै भिक्षामानीय स्थापनमपि नापेक्ष्यते।'

'गुरुवर्याः! किमपि अखादित्वा कथं जीवति?'

'तस्य अधुना ध्यानमेव आहारः। तस्य सङ्कल्पेनैव अन्येषाम् उदरपोषणस्य स्थितिं सः अधुना प्राप्तवान् अस्ति।'

इत्थम् उक्तवन्तः चेदपि, दिनत्रयानन्तरं शङ्करस्य समाधिस्थितिं दृष्ट्वतां गुरूणामेव भयमभवत्। 'इतःपरम् एवमेव उपेक्ष्यते चेत् अयं रुद्रग्रन्थिमपि भित्त्वा सहस्रारे तिष्ठति। अनन्तरं सः ईश्वरः इव प्रवृत्तिरहितः भवति। तदा अनेन लोकार्थं किमपि प्रयोजनं न भवति। किन्तु अनेन अग्रे महाकार्याणि साधनीयानि सन्ति' इति बहुधा



विचिन्त्य, तम् उत्थापयितुं निरचिन्वन्। गुहां प्रविश्य मृदुतया शिरसि दक्षिणकरं निहितवन्तः। मन्दं मन्दं मर्दयन्तः, 'शङ्कर, पर्याप्तम्। उत्तिष्ठतु पुत्रक' इति मृदुतया अवदन्। शङ्करः शनैः शनैः बहिर्मुखः अभवत्। नेत्रे उन्मीलितवान्। ते रक्तेन्दीवरे इव विकसिते। मन्दम् उत्थितवान्। गुरून् साष्टाङ्गं नमस्कृतवान्। गुरवः बहुकालं यावत् मातृवात्सल्येन तम् आलिङ्ग्य स्थितवन्तः। अनन्तरं प्रतिनिवर्तितवन्तः। गुरुषु प्रतिनिवृत्तेषु सत्सु अन्ये शिष्याः सर्वेऽपि समूहशः आगत्य नमस्कर्तुम् उद्युक्ताः; शङ्करः अवरोधं कृतवान्।

* * * * * * *

कतिपयदिनानां विश्रान्त्यनन्तरं गुरवः शङ्कराय पूर्वमीमांसाशास्त्रपाठनम् आरभन्त। 'वेदे भागद्वयमस्ति; कर्मकाण्डं ज्ञानकाण्डं चेति। अधुना कर्मकाण्डविचारे शृणोतु। जीवितावधौ मरणानन्तरं च सुखप्राप्तये किं करणीयमिति अयं भागः सूचयति। तत् अस्माभिः स्वयं विचिन्त्य ज्ञातुम् असाध्यम्। कथमिति चेत्; साधारणतया जनाः सुखप्राप्त्यर्थं स्वयं निश्चितया रीत्या यतन्ते। किन्तु सुखप्राप्तेः आश्वासनं नास्ति; बहुवारं सः प्रयत्नः दुःखे पर्यवस्यति। ज्ञानकाण्डं तु शाश्वतसुखप्राप्तये प्राप्तव्यस्य मोक्षस्य विचारे बोधयति। एतद्विचारे जनैः ऊहया ज्ञानम् असाध्यम्। अतः सुखप्राप्ति–साधनं वेदः एव वदेत्।'

शङ्करः अपृच्छत् : 'जनाः विषयान् प्रत्यक्षेण अनुमानेन च निश्चिन्वन्ति। स्वैः निश्चितं साक्षात् अनुभववेद्यं भवतीत्यतः तयोः प्रमाणयोः विश्वासः अस्ति। वेदे विश्वसितुं कः आधारः?'

'वदामि, शृणोतु। गतजन्मनां कर्म, अधुनातनकर्मणः अनुकूलकरं चेत् कर्मणः फलं प्राप्यते, विरुद्धं चेत् न प्राप्यते। गतजन्मानि प्रत्यक्षाणि न। अतः कश्चित् अन्यः इव कर्म कृत्वा, सः इव सुखं प्राप्तुं न शक्नोति। जीवद्दशायां सुखप्राप्तेः उपाये एव इत्थं रहस्ये सति, मरणानन्तरस्य सुखप्राप्तेः रहस्यं कथं ज्ञातुं शक्यते? केवलं हृदयस्थः परमेश्वरः एव एकैकस्यापि गतजन्मनां कर्म जानाति। तस्य सुखप्राप्तये तेन किं करणीयम् इति वक्ता सः ईश्वरः। वेदः तस्मादेव आगतः। सः केनापि बुद्धिमता विचिन्त्य लिखितः ग्रन्थः न। सः अपौरुषेयः। अतः प्रत्यक्षानुमानाभ्याम् अग्राह्य–विषयाणां वेदः एव प्रमाणम्।'

'वेदः ईश्वरात् आगतः इति कथं ज्ञायते?'

Maha Parivrajaka

'वेदे विद्यमानैः कैश्चित् लक्षणैः ज्ञातुं शक्यते। आदिमं लक्षणम् इदम् : कस्यचन प्रसिद्धग्रन्थस्य कर्ता कः इत्यपि प्रसिद्धमेव भवति। व्याकरणं पाणिनिरचितं, महाभारतं व्यासरचितं, मूलरामायणं वाल्मीकिरचितम् इति सर्वेऽपि जानन्ति। कियन्तं कालं यावदपि तत् कोऽपि न विस्मरति। तथैव वेदस्यापि यदि एकः कर्ता स्यात् तर्हि सः कः इत्यपि ज्ञातं स्यात्। किन्तु कोऽपि न जानाति। द्वितीयं लक्षणम् : वेदे स्वरः, मात्राबलम् इत्यादीनि सङ्गीतलक्षणानि सन्ति। स्वराः त्रयः। उच्चस्वरस्य ऋषभः, नीचस्वरस्य निषादः, मध्यस्वरस्य षड्जः च उपयुज्यते। सामवेदे सप्तस्वराः विद्यन्ते। अक्षरस्य कियता दैर्घ्येण उच्चारणं करणीयमिति मात्रया निश्चितं भवति। इदं कोकिलस्य कूजनमिव, इदं मयूरस्य केकारवः इव इत्यादिरूपेण प्रोक्तम्। अपि च एकैकस्यापि अक्षरस्य उच्चारणमपि परम्परया निश्चितमस्ति। बहुषु स्थलेषु स्वरभेदेन अर्थभेदोऽपि जायते। तस्य एका कथा अस्ति।

त्वष्टा इत्येकः असुरः। सः इन्द्रजेतारं पुत्रम् अभिलष्य एकं यागम् अकरोत्। यागस्य अन्तिमे घट्टे भीताः देवताः रक्षणार्थं सरस्वतीं प्रार्थयन्त। सरस्वती अङ्गीकृत्य योगशक्त्या त्वष्टुः कण्ठे प्राविशत्। अन्ते तेन 'इन्द्रशत्रो वर्धस्व' इति देवता प्रार्थनीया आसीत्। अस्मिन् पदे द्वितीयस्याक्षरस्य नीचस्वरः, चतुर्थस्य उच्चस्वरः, अन्येषां मध्यस्वरः। कण्ठे प्रविष्टायाः सरस्वत्याः प्रभावेण सः द्वितीयम् अक्षरम् उच्चस्वरयुक्तम्, अन्यानि मध्यस्वरयुक्तानि च उच्चारितवान्। एतेन 'इन्द्रस्य शत्रो वर्धस्व' इति स्थाने 'इन्द्रः यस्य शत्रुः सः' इति अर्थः अभवत्! अग्रे तस्य पुत्रः त्वाष्ट्रः इन्द्रेण हतः। एवम्प्रकारेण निश्चिताः स्वरमात्रादयः अनादिकालात् समग्रे देशे अनुवर्तमानाः सन्ति। एतत् यदि एकेन कविना निश्चितं तर्हि एवं न अनुवर्तेत।

तृतीयं वेदस्य अनन्तत्वलक्षणम्। महापुरुषस्य पतञ्जलेः अनुसारं तस्य काले वेदस्य शाकलशाखा, बाष्कलशाखा, तैत्तिरीयशाखा, माध्यन्दिनशाखा इत्याद्याः ११३१ शाखाः आसन्। तासां सम्पूर्णपारायणार्थं प्रायः ५०,००० होराः अपेक्ष्यन्ते। एतेन वेदस्य विस्तृतिः अपारा इति निश्चितं भवति। एतावत् विस्तृतं साहित्यम् एकः मनुष्यः रचयितुं न शक्नोति।

बहुकर्तृत्वमपि असाध्यम्। यतो हि सर्वेषां सर्वेषु विचारेषु एकाभिप्रायः भवितुं नार्हति। किन्तु वेदे कस्मिंश्चिदपि विचारे विरुद्धाभिप्रायाः न सन्त्येव। इदं वेदस्य चतुर्थं लक्षणम्। एतान् चतुरः अंशान् स्मरामः चेत् वेदः अपौरुषेयः इत्यत्र सन्देहाः नोत्पद्यन्ते।'



'गुरुवर्याः! ईश्वरात् जातान् शब्दस्पर्शरूपरसगन्धान् वयं प्रत्यक्षतया अनुभवामः। किन्तु तस्मादेव जातान् वेदान् न शृण्मः। ते कथं मनुष्यैः प्राप्यन्ते?'

'भवान् इतः पूर्वं सृष्टिक्रमं ज्ञातवान् अस्ति। सस्यादीनां सृष्टेः अनन्तरम् अयोनिजाः मरीच्यादिसप्तर्षयः, सनकादिज्ञानिनः च भूमेः एव जनिं प्राप्नुवन्ति। ते सर्वेऽपि पूर्वतनसृष्टिस्थाः महापुरुषाः, तपस्विनः, योगिनः च। गतजन्मसु तैः अधीताः वेदभागाः परमेश्वरानुग्रहेण तेषां स्मरणे आयान्ति। कर्मकाण्डस्य भागान् मरीच्यादयः, ज्ञानकाण्डस्य भागान् सनकादयश्च स्मरन्ति। यैः ये भागाः स्मर्यन्ते ते तेषां भागानाम् ऋषयः। ते द्रष्टारः, न तु कर्तारः। अनन्तरं सप्तर्षीणां कुलेषु जाताः नैके द्रष्टारः अभवन्। एवं वेदः नित्यः।'

'एतावत्पर्यन्तं सुखेन गृहीतः अयं विचारः इतोऽपि गभीरतया अवगन्तव्यः। ततः पूर्वं शब्दस्य, शब्दार्थयोः सम्बन्धस्य च नित्यत्वम् अवगच्छतु। पूर्वमेव मनसि विद्यमानानि पदानि वाग्रूपेण प्रकाशन्ते इति सर्वेषाम् अनुभवः। पदानि मनसि कुतः आयान्ति, वदतु।'

'पूर्वजैः श्रुतानि स्मृतौ आसन्। स्मृतेः आगत्य मनसि प्रविशन्ति।'

'पूर्वजेभ्यः कुतः आगतानि?'

'तेषां पूर्वजेभ्यः आगतानि।'

'अतः पदानि अनादीनि, पदार्थयोः सम्बन्धश्च अनादिः इति सिद्धम्। अतः पदानि पदार्थाश्च पौरुषेयाः न। 'सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन् यदास्ते' - सः धीरः सर्वाणि रूपाणि कृत्वा तानि नाम्ना आह्वयति। एवमेव वेदवाक्यान्यपि अनादीनि अपौरुषेयाणि च।'

प्रश्नः : 'शब्दः शब्दार्थयोः सम्बन्धश्च नित्यः चेदपि वाक्यस्थपदसमूहस्यापेक्षया विशिष्टः कश्चन अर्थः वाक्ये भवति। अतः वाक्यानि पौरुषेयाणि खलु?'

उत्तरम् : 'वाक्यार्थः तत्रत्यैः पदैः एव ज्ञायते इत्यतः इयं कल्पना न करणीया। वाक्यस्य विशिष्टः अन्यः कश्चन अर्थः यदि अस्ति तर्हि तस्य बोधार्थम् अपरं वाक्यमेव अपेक्ष्यते।'

प्रश्नः : 'एकमेव अर्थं पर्यायपदानि उपयुज्य विभिन्नैः वाक्यैः वक्तुं शक्यते। तद्वदेव वेदस्य अर्थः एकः चेदपि, ऋषीन् अनुसृत्य तस्य बोधकानि वाक्यानि विभिन्नानि भवेयुः खलु? अतः वेदः पौरुषेयः भवेत् खलु?'

उत्तरम् : 'तथा न। अर्थस्य ज्ञाता पर्यायपदैः तम् अन्येभ्यः बोधयितुं शक्नोति

इति तु सत्यमेव। वेदभाष्यकाराः एतदेव कुर्वन्ति। किन्तु अर्थं ज्ञातुं वाक्यमेव आधारः। अपि च वेदस्य अर्थः इतरेभ्यः प्रमाणेभ्यः गोचरः न भवति। अतः वेदार्थस्य ज्ञातुः दृष्ट्या आदौ वेदवाक्यम्, अनन्तरं तस्य अर्थग्रहणम्। वेदार्थं ज्ञातवतां वेदद्रष्टृणाम् अपि अयमेव नियमः अन्वितः भवति। पुनश्च वामदेवः इव, एतावता एव वेदार्थं ज्ञातवन्तः, यैः वाक्यैः स्वयं ज्ञातवन्तः वा, ते तान्येव स्मृत्वा वेदद्रष्टारः भवन्ति इति कथने कोऽपि अन्तरायः नास्ति; पर्यायवाक्यानि स्मरन्ति इति कल्पने अनिवार्यं कारणमपि नास्ति। पुनश्च ज्ञानं, स्मरणं च भगवतः अनुग्रहेण भवेत् : 'सर्वस्य चाहं हृदि सन्निविष्टः मत्तः स्मृतिर्ज्ञानमपोहनं च'। अतः पूर्वतनसृष्टिस्थानि वाक्यानि एव भगवान् ऋषिभ्यः स्मारयति इति कथनमेव समञ्जसम्। 'सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् दिवं च पृथिवीं चान्तरिक्षमथो स्वः' – इत्युक्तौ ब्रह्माण्डस्य सृष्टिरेव यथापूर्वम् इति उक्ते सति, ब्रह्माण्डस्य एकः अंशरूपः वेदः अपि यथापूर्वमेव स्यात्।'

प्रश्नः : 'तर्हि वेदवाक्यश्रवणेन विभिन्नैः विभिन्नाः अर्थाः किमर्थं ज्ञायन्ते?'

उत्तरम् : 'अर्थग्रहणाय अन्तरायजनकैः तेषां तेषां संस्कारैः इत्थं भवति। विरुद्धसंस्काराणां कारणेन श्रुतार्थस्य हानिं जनयित्वा अश्रुतार्थस्य कल्पनां कुर्वन्ति। अस्य निवारणार्थं जिज्ञासा भवति। एकैकेन एकैकस्य अर्थस्य ग्रहणं वेदवाक्यस्य दोषः न; श्रोतुः दोषः। अतः प्रमातुः दोषस्य प्रमाणस्य उपरि पातनं न समीचीनम्। उदाहरणार्थं, शुक्तौ रजतस्य दर्शनं नेत्रस्य दोषः न, द्रष्टुः संस्कारदोषः।'

प्रश्नः : 'वाक्यश्रवणानन्तरं दोषपूर्णस्य अर्थस्य ग्रहणे कारणं किमिति ज्ञातम्। किन्तु सुसंस्कृतस्यापि वाक्यश्रवणानन्तरं संशयाः जायन्ते। तस्य किं कारणम्?'

उत्तरम् : 'तस्य कारणम् इत्थम् : गभीरस्य विषयस्य एकेनैव वाक्येन बोधनम् असाध्यम्; बहूनि वाक्यानि उपयोक्तव्यानि भवन्ति। एकैकमपि वाक्यम् एकदेशीयतया प्रयुक्तं सत्, श्रोतारं समग्रार्थं प्रति नयति। प्राप्तव्यस्य गृहस्य दिक्, प्राप्तुम् आवश्यकान् मार्गान् अनुसृत्य सापेक्षतया यथा परिवर्तते तथा वाक्यानां दिक्परिवर्तनम् अनिवार्यम्। तदा संशयाविर्भावः अपि सहजः एव। अतः, अर्थग्रहणार्थं विषयप्रतिपादनस्य उपक्रमात् उपसंहारं यावत् शान्ततया श्रवणम् आवश्यकम्। इत्थं कृते सति संशयाः न भवन्ति' इति शङ्करस्य संशयान् परिहृत्य विषयम् अनुवर्तितवन्तः।

'लौकिकार्थबोधकानि वाक्यानि पौरुषेयाणि। तेषु अविद्यमानं विद्यमानमिव (माया), विद्यमानम् अविद्यमानमिव (अलीकम्), दुरुद्देशेन असत्यरूपेण अर्धसत्य-



रूपेण (वञ्चना) वा प्रतिपादयन्तः दोषाः भवेयुः। ते न भवन्ति चेदपि भ्रमप्रमादास्तु भवन्त्येव; यतो हि, तेषु समग्रदृष्टिः सर्वथा असाध्या। किन्तु प्रत्यक्षादीनाम् अविषये तु अलौकिककार्थबोधकेषु च वेदवाक्येषु इमे दोषाः न सन्ति; यतो हि, क्षेत्रक्षेत्रज्ञाभ्याम् उभाभ्यामपि अन्तर्भूतं समग्रं ब्रह्माण्डं मनसि निधाय प्रोक्तानि वाक्यानि एतानि। अतः तानि अपौरुषेयाणि एव।'

प्रश्नः : 'तथा चेत् वेदः मनुष्यैः कथं प्राप्यते?'

उत्तरम् : 'एतादृशाः निर्दिष्टाः वेदमन्त्राः मन्त्रद्रष्टृभिः द्वारा नादस्वरपदवाक्यरूपैः व्यक्ताः भवन्ति। ते द्रष्टारः, न तु कर्तारः।'

प्रश्नः : 'मन्त्राः इतरेषामपि स्मृतिपथे किमर्थं नायान्ति?'

उत्तरम् : 'यस्य कस्यापि वा भवतु, स्मरणसामर्थ्यं तु गतजन्मनां कर्मानुगुणमेव भवति। केवलम् आहारनिद्राभयमैथुनेषु प्रवृत्तिवताम् अन्येषां केवलं तेषां स्मरणमेव भवति। किन्तु मन्त्रद्रष्टारः गतजन्मसु कृतेन असाधारणेन वैदिकतपसा मन्त्रस्मरणसामर्थ्यं प्राप्तवन्तः भवन्ति।'

एवमेव गोविन्दगुरूणाम् अध्यापनम् अनुवृत्तम्। गुरुकुले एव श्रौतस्मार्तकर्माणि पश्यन् प्रायशः अवगतवान् आसीत् इत्यतः, अत्र मन्त्रः, अर्थवादः इत्यादीनां प्रामाण्यनिर्णयः, कर्मभेदस्य कारणानि, कर्माधिकारः इत्यादिद्वादशाध्याययुतं मीमांसाशास्त्रं शङ्करः अत्यल्पेनैव कालेन पूर्णतया अधीतवान्।

गोविन्दभगवत्पादाः तस्य ईश्वरनामसंवत्सरस्य कार्त्तिकशुद्धैकादश्यां तिथौ उषःकाले शङ्करस्य क्रमसंन्यासार्थं सङ्कल्पमकुर्वन्। वार्तायामस्यां ज्ञातायां शतशः संन्यासिनः, सहस्रशः सज्जनाः च तम् अभूतपूर्वं प्रसङ्गं द्रष्टुं दिनद्वयात् प्रागेव आगत्य ओङ्कारेश्वरस्य मन्दिरेषु, धर्मशालासु च स्थानं रक्षितवन्तः। बहवः वैदिकाः समागत्य गोविन्दगुरून् नमस्कृत्य, संन्यासस्वीकारात् प्राक् आचरणीयानि देवर्षिदिव्यमनुष्यभूतपितृमातृ-श्राद्धानि, आत्मश्राद्धम्, विरजाहोमश्च तैः कारणीयः इति तान् प्रार्थयन्त। 'इमानि कर्माणि केवलं विविदिषासंन्यासे आवश्यकानि; शङ्करस्तु एतावता एव आपत्संन्यासं स्वीकृतवान् इत्युक्त्वा गोविन्दगुरवः तान् प्रेषितवन्तः।

अनन्तरं गोविन्दगुरूणां परिचिता काचित् वृद्धसाध्वी आगत्य नमस्कृत्य अवदत् 'गुरुवर्याः! शङ्कराय अहं कौपीनद्वयम् आनीतवती। नूतनं वस्त्रं काषायवर्णमिश्रिते कोमलनारिकेलजले निमज्य अनन्तरं शुष्कीकृत्य आनीतवती। तस्मिन् उत्तमजम्बीराणां रसं योजितवती। अतः वर्णः नापगच्छति। कृपया अस्माकं शङ्कराय भवद्भिः

इदमेव दातव्यम्।'

'सः भवतां शङ्करः वा? अस्माकं शङ्करः न वा?' इति विनोदं कृत्वा गुरवः तदेव शङ्कराय दीयते इत्यवदन्। स्वल्पसमयानन्तरम् एकं दण्डं गृहीत्वा कश्चित् वृद्धः आगत्य नमस्कृतवान्।

'गुरुवर्याः! अहम् ईश्वरमन्दिरे सेवां कुर्वन् अस्मि। रङ्कदासः इति अभिधानम्। एकादश्यां तिथौ अस्माकं शङ्करप्रभवे संन्यासदीक्षां प्रयच्छन्ति इति अश्रौषम्। तस्मिन् समये भवन्तः तस्मै दण्डं प्रयच्छन्ति खलु? अर्चकेषु विचार्य सः कियान् दीर्घः स्यात् इति ज्ञातवान्। तावता परिमाणेन एव समीचीनतया छित्त्वा, अग्रभागद्वयमपि उद्वर्त्य निर्मलं कृतवान्, अत्र भित्तानि न सन्ति। कृपया तस्मै अयमेव दण्डः दातव्यः इति प्रार्थये' इत्युक्त्वा दण्डं पुरस्तात् स्थापितवान्।

'शङ्करं भवान् जानाति किम्?'

'हाँ..सम्यक् जानामि गुरुवर्याः। देवालयं यदा आगच्छति तदा 'रङ्क, कुशली अस्ति किम्?' इति विचारयति। बहुवारं द्राक्षाः, कदलीफलानि च प्रयच्छति। अस्माकं शङ्करप्रभुः भगवानेव गुरुवर्याः।'

'भवतु भोः! भवता दत्तः इत्युक्त्वा ददामि। अस्तु वा?'

श्वः दीक्षादिनम्। अद्य रात्रौ अन्ये शिष्याः सर्वे शङ्करं परितः स्थित्वा, आद्यन्तरहितानि यानि कानिचन वचनानि भाषमाणाः सन्ति। एकः ज्येष्ठः संन्यासिशिष्यः, शङ्करस्य शिरसि वर्षत्रयात् समृद्धरूपेण प्रवृद्धान् कृष्णकेशान् स्पृशन् 'शङ्कर, श्वः एते केशाः सर्वे गमिष्यन्ति। किं वदति?' इति अपृच्छत्। 'गच्छन्तु इति वदामि' इत्यवदत् शङ्करः। सर्वेऽपि उच्चैः हसितवन्तः। सर्वेषां तस्य स्पर्शने अभिलाषः; किन्तु स्प्रष्टुं किमपि भयम्। तस्य व्यक्तित्वमेव तादृशम्। अन्ते तु धैर्यं कृत्वा स्पृशन्ति; भयं तेषाम् अभिलाषात् पराजितं भवति। रात्रिः अपगता। शङ्करः उषःकाले उत्थाय नर्मदायां स्नात्वा आगत्य गुरून् नमस्कृतवान्। अनन्तरं गुरूणाम् आज्ञानुसारं क्षौरिकः शङ्करस्य क्षौरं विधाय, तं साष्टाङ्गं नमस्कृतवान्। 'भवतः नाम किं भोः?' इति शङ्करः तम् अपृच्छत्।

'गोविन्दः।'

'सुखं जीव' इति शङ्करः तस्य आशीर्वादम् अकरोत्। सः केशैः नेत्रस्पर्शम् अकरोत्। तान् केशान् केऽपि यथा पद्भ्यां न स्पृशेयुः तथा दूरस्थस्य वृक्षस्य अधः आलवाले गर्तं कृत्वा तस्मिन् संस्थाप्य मृदा आच्छादितवान्। स्नानार्थं शङ्करः



नदीम् अवातरत्। स्नानं परिसमाप्य नद्याम् एव स्थित्वा गुरून् अपश्यत्। तेषां सूचनानुसारं 'ओं भूः संन्यस्तं मया, ओं भुवः संन्यस्तं मया, ओं सुवः संन्यस्तं मया, ओं भूर्भुवस्सुवः संन्यस्तं मया' इति मन्द्रमध्यमोच्चस्वरेण त्रिवारं प्रैषोच्चारणं कृत्वा सङ्कल्पवारि त्यक्तवान्। अनन्तरं गुरवः तेन द्वारा 'पुत्रेषणा वित्तेषणा लोकेषणा मया परित्यक्ता। अभयं सर्वभूतेभ्यो मत्तः स्वाहा' इति वाचयित्वा सङ्कल्पवारि दातुम् अवदन्। तथैव वारि दत्तम्। अनन्तरं नग्नरूपेण एव नद्याः आगत्य गुरूणां पुरस्तात् अतिष्ठत्। गुरवः कौपीनं दत्त्वा धर्तुं सूचितवन्तः; तत् वृद्धसाध्व्या दत्तमिति सूचितवन्तः, अनन्तरं धर्तुं काषायवस्त्राणि प्रायच्छन्। अनन्तरं प्रणवमन्त्रम् उपदिश्य, 'रङ्कदासेन दत्तः' इत्युक्त्वा दण्डमपि प्रायच्छन्। भस्म धृत्वा, दण्डं कमण्डलुं च गृहीत्वा स्थितः बालशङ्करः शङ्करभगवत्पादः अभवत्। तस्मिन् एव क्षणे काषायवर्णयुतः अरुणः उदितः। ज्ञानसूर्यस्य उदयः जातः। मन्दिरस्य घण्टाः, जयघण्टाः, पटहाः, शङ्खाश्च अनदन्। मुमुक्षूणां दक्षिणनेत्राणि, दुर्मतीनां वामनेत्राणि च स्फुरितानि। समवेते जनस्तोमे अवर्णनीयः उत्साहः आगतः। 'सनातनधर्मः विजयताम्' इति एककण्ठेन उदघोषयन्।

तस्मिन् अपराह्णे एव गुरवः ब्रह्मसूत्राणां पाठनम् आरभन्त। 'अद्य भवते उपनिषदां सारं वक्तुम् अभिलषामि। सः प्रत्येकं दिनस्य अनुभवाधारेण स्थितः। अतः तं सरलभाषया वक्तुं शक्नुमः। आदौ तया रीत्या अवगच्छतु। तेन अग्रे शास्त्रीयचर्चायाः ग्रहणं सुलभं भवति।

मनुष्यः कियता प्रमाणेन प्रयतते चेदपि तस्य दुःखपरिहारः सुखप्राप्तिश्च न भवत्येव। किमर्थम् इति चेत्, उपनिषत् इत्थं कथयति : भवान् कः इति भवतः अज्ञानमेव अस्य कारणम्। तत् अवगच्छति चेत् लेशमात्रमपि दुःखं न भवति। भवान् आनन्दसागरः ब्रह्म इति।'

'अहं कः इति अहं जानामि खलु। मम नाम शङ्करः। मम दश वर्षाणि । अहं संन्यासी।'

'ह्यः रात्रौ भवान् कुत्र शयितवान्?'

'देवालयस्य प्रकोष्ठे।'

'कं स्वप्नम् अपश्यत्?'

'नर्मदां तीर्त्वा पर्वतानाम् उपरि उत्प्लवन् गच्छन् अस्मि इव स्वप्नम् अपश्यम्।'

'अधुना वदतु, भवान् देवालयस्य प्रकोष्ठे शयितः शङ्करः वा? उत पर्वतानाम्

उपरि उत्प्लुत्य गतः वा?'

'स्वप्नकाले मम शरीरेण सह सम्बन्धः नासीत्। किन्तु मनसः सम्बन्धः आसीत्। अतः एतादृशं स्वप्नम् अपश्यम्।'

'अनन्तरं समीचीनतया निद्रा आगता वा न वा!'

'आगता।'

'तस्यां गाढनिद्रायां भवान् कः आसीत् इति वदतु।'

'न जाने।'

'विचिन्त्य वदतु।'

'तद्विषये चिन्तयितुमपि असाध्यम्।'

'किमर्थम् असाध्यम्!'

'तदा मम शरीरेण सह सम्बन्धोऽपि नासीत्, मनसा सह सम्बन्धोऽपि नासीत्। अतः तदा अहं कः आसम् इति चिन्तनमपि असाध्यम्।'

'अस्य कः अर्थः इति भवानेव पश्यतु। शरीरमनसोः सम्बन्धे सति भवान् प्रकोष्ठे शयितः आसीत्। केवलं मनसः सम्बन्धे सति पर्वतानाम् उपरि प्लवमानः आसीत्। उभयोः अपि सम्बन्धयोः अभावे सति भवान् कः इति भवता न ज्ञायते। किन्तु केवलं भवतः शरीरादिना सह सम्बन्धः नास्ति इति ज्ञायते। तदा भवान् कः इति वदामि शृणोतु। शरीरम्, तत्रत्यानि इन्द्रियाणि, मनः, प्राणाः इति सर्वान् सङ्कलय्य क्षेत्रम् इति वदन्ति। अस्य ज्ञाता भवान् क्षेत्रज्ञः। क्षेत्रं भवतः विषयः। ज्ञाता, ज्ञातात् विषयात् भिन्नः एव भवति। सः भवान् एव मनसः सम्बन्धेन स्वप्नं जानाति, मनश्शरीरयोः सम्बधेन जगत् जानाति। गाढनिद्रायां भवान् एकाकी एव अस्ति। तदेव भवतः वास्तविकस्वरूपम्। तादृशं भवन्तम् उपनिषत् ब्रह्म इति वदति।'

'ब्रह्म इत्युक्ते किम्?'

'आभरणस्य स्वर्णं कारणमिव तत् अस्य समग्रजगतः कारणम्। आभरणं कार्यम्। तत् जायते, स्थितौ परिवर्तते, कदाचित् नष्टं भवति। एवं परिवृत्तिशीलम् इत्यतः आभरणम् असत्यम्। किन्तु स्वर्णं न परिवर्तते; इत्युक्ते तत् सत्यम्। तद्वदेव जगत् असत्यम्, ब्रह्म सत्यम्। इदं ब्रह्मणः आदिमं लक्षणम्। आभरणस्य दृष्टान्तेनैव ब्रह्मणः द्वितीयं लक्षणमपि ज्ञातुं शक्यम्। आभरणानि विभिन्नानि, एकस्मिन् अपरं नास्ति। एकैकस्यापि एका सीमा अस्ति, अन्तमस्ति। किन्तु स्वर्णं सर्वेषु आभरणेषु व्याप्तं विद्यते। इत्युक्ते आभरणेषु विद्यमानम् अन्तत्वं स्वर्णे नास्ति। अतः अनन्तम्।



तद्वदेव जगद्वस्तूनाम् अन्तमस्ति, ब्रह्मणः नास्ति। तत् अनन्तम्। इदं ब्रह्मणः द्वितीयं लक्षणम्। तृतीयलक्षणार्थं भवतः बुद्धिमेव पश्यतु। तदपि }ēकार्यमेव। तस्मात् भवान् विषयान् जानाति। तदा बुद्धौ जातम् अङ्गुलीयकज्ञानम्, कङ्कणज्ञानम्, हारस्य ज्ञानं च। इदं सर्वम् असत्यं सान्तं च। किन्तु एतेषु सर्वेषु ज्ञानेषु अन्तर्भूतं ज्ञानमात्रं सत्यम् अनन्तम्। इदं ब्रह्मणः तृतीयं लक्षणम्। भवतः बुद्धिसम्बन्धे सति तत्र असत्यज्ञानानि सञ्जायन्ते। तद्राहित्ये सत्यं ज्ञानम् अनन्तं च ब्रह्म भवान् भवति। तदेव भवतः निजस्वरूपम्। तत्रत्यः आनन्दः सहजः, विषयान् न वाञ्छति। तत्र दुःखसम्पर्कः एव नास्ति। अतः 'अहं तत् ब्रह्म, शरीरादयः न' इति दृढतया भवता अवगतं चेत् सर्वदापि तस्मिन् आनन्दे एव तिष्ठति, एतस्य मननं कुर्वन् भवतु। श्वः अमुमेव विषयं शास्त्रपरिभाषया वदिष्यामि; सुखेन अवगम्यते।'

परेद्यवि पाठनस्य आरम्भात् पूर्वं पूर्वमीमांसायाः समीक्षां कुर्वन्तः ते अवदन् : 'इहामुत्रार्थानां भोगप्राप्तये धर्मजिज्ञासा अभवत्। ऐहिकसुखानि सर्वाण्यपि क्षणिकत्वं, क्षुल्लकत्वं, अशुचित्वं, दुःखमिश्रितत्वं, श्रमसाध्यत्वम् इत्याद्यनेकैः दोषैः युक्तानि। पुनश्च स्वर्गादिसुखान्यपि अनित्यान्येव। कामकामिनः एतेष्वेव रमन्ते चेदपि विवेकिनः नित्यनिर्दोषात्यन्तिकसुखं मोक्षं वाञ्छन्ति। इदं सुखं घटः इव उत्पाद्यं न। आप्यं न– इत्युक्ते अन्यत्र गत्वा प्राप्तुं न शक्यम्। विकार्यं न– इत्युक्ते दुग्धस्य दधिरूपेण परिणमनमिव परिणामेन प्राप्तुं न शक्यम्। संस्कार्यं न– इत्युक्ते औषधेषु इव गुणान् योजयित्वा दोषान् निवार्य वा प्राप्तुं न शक्यम्। तत् सर्वदापि अस्मासु एव विद्यमानम्। किन्तु अज्ञानेन अनुभववेद्यं न भवति। इदं वचनं श्रुत्वा जनाः आश्चर्यमनुभवन्ति। किन्तु एतत् सुखेन कथं ज्ञातुं शक्यमिति पश्यतु :

सुषुप्तौ जीवस्य स्थूलसूक्ष्मशरीरयोः सम्बन्धः न भवतीति, अत्यधिकानन्दस्य अनुभवः भवतीति च सर्वेषाम् अनुभवः। तदा सुखेन निद्राणः एव क्षेत्रज्ञः– इत्युक्ते क्षेत्रस्य ज्ञाता। शरीराण्येव क्षेत्रम्। क्षेत्रज्ञे एव सति विद्यमानः आनन्दः तस्य स्वभावः। इदम् अनुभवे अस्ति चेदपि, उत्थानानुक्षणं जाग्रदवस्थायाम् एतत् विस्मृत्य शरीरेण सह इत्युक्ते क्षेत्रेण सह अविद्यमानं सम्बन्धं प्रकल्प्य, स्वं स्त्री, पुरुषः इत्यादिरूपेण सम्भाव्य सुखं प्राप्तुं प्रयतते। अनेन प्रकारेण, अविद्यमानस्य सम्बन्धस्य क्षेत्रज्ञे कल्पनम् अध्यासः इत्युच्यते। स्वेनैव स्वस्य अन्यथाज्ञानम् एव अध्यासः। क्षेत्रज्ञः अहं कः इति ज्ञातुम् अशक्यम् अज्ञानमेव अध्यासस्य कारणम्। सुषुप्तौ अहं कः आसम्? कुत्र आसम्? इत्येतत् किञ्चिदपि अज्ञात्वा सुखेन निद्राणः आसम्'

इति उत्थानानन्तरम् एतत् अज्ञानमेव सर्वे वदन्ति। स्वयं कः इति ज्ञातं चेत् इदम् अज्ञानं नश्यति। तदा अध्यासः अपि नश्यति। अपि च क्षेत्रज्ञः अहं कः इति प्रत्यक्षरूपेण दृष्ट्वा बुद्ध्या ऊहित्वा वा ज्ञातुं न शक्नुमः। ज्ञानेन्द्रियाणां बुद्धेः च सुषुप्तौ प्रवेशः एव नास्ति। अतः एतत् वेदेनैव ज्ञातव्यम्। वेदः 'क्षेत्रज्ञः ब्रह्म' इति वदति। अपि च, ब्रह्म इत्युक्ते किम् इति ब्रह्मसूत्राणि वेदस्य आधारेण निश्चिन्वन्ति। अतः वेदान्तशास्त्रम् 'अथातो ब्रह्मजिज्ञासा' इति सूत्रेण आरभ्यते। अतः- ऐहिकामुष्मिकसुखानि अनित्यानि इत्यतः, अथ-अनन्तरं-विवेकवैराग्यादीनां प्राप्त्यनन्तरं, ब्रह्मजिज्ञासा-ब्रह्म ज्ञातुम् इच्छा करणीया- ब्रह्मणः विचारे चिन्तनं करणीयम्। एतत् ब्रह्म ज्ञातुं जगतः द्वारा एव साध्यम्; यतो हि जगत् ब्रह्मणः कार्यम् – इत्युक्ते ब्रह्मणः एव भूत्वा, ब्रह्मणि एव सत्, ब्रह्मणि एव लयीभवनरूपः विकारः। 'जन्माद्यस्य यतः' इति द्वितीयं सूत्रम् एतदेव बोधयति। अस्य – अस्य जगतः, जन्मादिः – जन्मस्थितिलयाः, यतः – यस्मात्, तत् ब्रह्म। इत्युक्ते ब्रह्म जगतः निमित्तकारणमपि अस्ति, उपादानकारणमपि अस्ति इत्यर्थः। ब्रह्मस्वरूपम् एतेन वाक्येन निश्चितं भवति।

निश्चयस्य क्रमः एवम् : घटस्य निमित्तं कुलालः, उपादानं मृत्। आदौ उपादानत्वम् अवलोकयतु। घटः, इष्टिका, मृच्छदः इत्यादयः मृदः विकाराः जायन्ते, भिद्यन्ते इत्युक्ते परिवर्तन्ते च। किन्तु मृदः परिवर्तनम् अभूत्वा एकरूपेणैव तिष्ठति। यत् न परिवर्तते तत् सत्यम्, यत् परिवर्तते तच्च असत्यम् इति वदन्ति। अतः घटेत्यादिः असत्यम्। मृत् सत्यम्। तद्वदेव जगत् असत्यं, तस्य उपादानं ब्रह्म च सत्यम्।'

ब्रह्मणः अपरं लक्षणम् अनन्तत्वम्, इत्युक्ते केनापि अन्तरहितं – मितिरहितम्। तच्च इत्थं निश्चीयते : घटः मृच्छदः न, मृच्छदः घटः न। अनयोः द्वयोः अपि मितिः अस्ति। किन्तु मृत् अनयोः द्वयोः अपि व्याप्ता इत्यतः तस्याः एतादृशी मितिः नास्ति। इत्थं जगतः सर्वेषामपि वस्तूनां काचिदेका मितिः अस्ति। किन्तु सर्वेषु सर्वदापि व्याप्तस्य ब्रह्मणः मितिः नास्ति। अतः ब्रह्म अनन्तम्।

तस्य तृतीयं लक्षणं ज्ञानम्। इदं किमिति निश्चयक्रमः इत्थम् : कुलालः इष्ट्वा विचिन्त्य च यथा घटं करोति तथा हिरण्यगर्भे प्रविष्टः ईश्वरः जगत् रचितवान्। कुलालस्य घटज्ञानम्, मृच्छदज्ञानम् इत्यादीनि घटमृच्छदौ इव असत्यानि; यतो हि तानि परिवर्तनशीलानि। किन्तु एतेषु ज्ञानेषु 'घटस्य' 'मृच्छदस्य' इति विशेषणैः रहितं विशेष्यज्ञानमस्ति खलु, तत् सत्यम्। एवमेव जगतः निमित्तकारणे



उद्भविष्यमाणानां जगद्वस्तूनां विशेषज्ञानानि असत्यानि चेदपि, तेषु विद्यमानं विशेष्यज्ञानं सत्यम्। इदं ज्ञानमेव ब्रह्मणः तृतीयं लक्षणम्।'

इत्थं ब्रह्म सत्यम्, ज्ञानम्, अनन्तं च अस्ति। अत्र विद्यमानः कश्चन चमत्कारः अवधातव्यः : जगत् असत्यं जडं सान्तं चेदपि ब्रह्मणः भिन्नं न। किन्तु ब्रह्म जगतः भिन्नम्। इदं वेदान्तस्य प्राणाः।

अधुना आदौ जीवस्य विचारे उक्तं स्मरतु। जीवस्य वास्तविकं रूपं जाग्रत्स्वप्नयोः न ज्ञायते; यतो हि सः शरीरेण सह सम्बन्धं पश्यति। तस्य वास्तविकं रूपं सुषुप्तौ अस्ति। किन्तु तदा 'अहं कः' इति ज्ञानं नास्ति; अज्ञानमस्ति। अहं कः इति ज्ञानप्रकारः कः? श्रुत्या ज्ञातव्यम्। श्रुतेः अनुसारं तदा अहं ब्रह्म। इदं वचनं समीचीनं वा इति परिशीलयतु। सुषुप्तौ स्वस्य केनापि विकारेण सह व्यवहारेण सह वा सम्बन्धः नास्ति; अतः कस्यापि परिवर्तनस्य अवसरः नास्ति – इत्युक्ते 'अहं सत्यः'। पुनश्च तदा विशेषज्ञानानि न सन्ति, अथापि विशेष्यज्ञानं तु भवेदेव। तत् सत्यमित्यतः तदा तस्य अभावः असाध्यः। अतः तदा अहं ज्ञानमपि अस्मि। इतःपरं तत्समये अन्तत्वकर्तारः देशकालाः एव न सन्ति। अतः अहम् अनन्तः अपि अस्मि। तस्मात् ब्रह्मणः त्रीणि लक्षणान्यपि स्वस्मिन् सन्ति। न केवलं तावत्। श्रुतिः ब्रह्मणः आनन्दः इति अपरं लक्षणमपि कथयति। तदपि सुषुप्तौ अनुभववेद्यं भवति। अतः सुषुप्तौ विद्यमानः अहं ब्रह्म इति निश्चितम् अभवत्।'

शङ्करः अपृच्छत् : 'त्रीणि लक्षणान्यपि स्वस्मिन् सन्ति, ब्रह्मणि अपि सन्ति। अथापि अहं ब्रह्म च भिन्नौ भवेतां खलु?'

'तत् असाध्यम्। यतो हि विशेष्यज्ञानद्वयं भवितुं नार्हति। तस्मात् भिन्नं किमस्ति चेदपि तत् ज्ञेयं भवति। अतः क्षेत्रज्ञः ब्रह्म एव, क्षेत्रज्ञः एव ब्रह्म। योऽहं सोऽसौ योऽसौ सोऽहम् – अहं यः, अयं सः एव, अयं यः, सः अहमेव' इति वदति श्रुतिः' इत्युक्त्वा गोविन्दभगवत्पादाः उपदेशं समापयन्। अनेन सर्वोत्कृष्टज्ञानेन शङ्करः देहादिजगतः सम्पूर्णतया विमुखः सन् नेत्रे निमील्य उपाविशत्। तस्य शरीरं निश्चलम् अभवत्। श्वसनं स्थगितम्। मुखम् अलौकिकतेजसा युक्तम् अभवत्। गुरवः बहुकालं यावत् तमेव पश्यन्तः आसन्। अमुं प्रचण्डं बालसंन्यासिनं पश्यन्तः परमसन्तुष्टाः अभवन्। बहुकालानन्तरं शिष्यस्य शिरः करेण मर्दयन्तः 'शङ्कर! उत्तिष्ठतु' इत्यवदन्। शङ्करः उत्थाय करौ संयोज्य 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' इति मन्त्रम् उक्त्वा गुरून् साष्टाङ्गं नमस्कृतवान्। गुरवः बालकम् आलिङ्गितवन्तः।

MahaParivrajaka

* * * * * * *

बहुधान्यसंवत्सरस्य चातुर्मास्यपूजा शङ्करेणैव करणीया इति गुरवः असूचयन्। विषये ज्ञाते सत्येव ओङ्कारेश्वरस्य सर्वेषाम् आश्रमाणां संन्यासिनः, तापसाश्च तत्रैव आगत्य भागं गृह्णीमः इत्यवदन्। सर्वेषां, शङ्करेण क्रियमाणां पूजां द्रष्टुम् अभिलाषः। न केवलं तावत्, चातुर्मास्यानन्तरं प्रायशः शङ्करः ओङ्कारेश्वरं त्यक्ष्यति इति पूर्वसूचना इयं स्यात् इति भयमपि जातमासीत्। देवालयपक्षतः एव पूजाव्यवस्था, सहस्रशः जनानां भोजनव्यवस्था च कृता। सर्वं वैभवेन एव प्रचलति चेदपि सर्वस्यापि मनसि काचित् व्याकुलता। पूजायाः अन्ते जनस्तोमेन गोविन्द–भगवत्पादेभ्यः, शङ्करभगवत्पादाय च नमस्कारेषु समर्पितेषु सत्सु, जनाः : 'गुरुवर्याः! चातुर्मास्यानन्तरं भवन्तः इतः प्रस्थास्यन्ति इति जनाः वदन्तः सन्ति, सत्यं किम्?' इति अपृच्छन् एव। 'अहं तु किमपि न जानामि खलु!' इति शङ्करः आश्चर्यं सूचयति चेदपि तेषां तु विश्वासः एव नागतः।

वर्षर्तुः प्राचुर्येण आरब्धः। छत्राणि बहिरागतानि। सर्वत्र सर्वेषां वदनेषु श्रूयमाणं वचनम् एतत् : 'अत्र कियती वृष्टिः इति वयमेव जानीमः खलु! तत्र अतीव वृष्टिः इति श्रुतम्!'। नर्मदानद्यां जलस्य प्रमाणम् अधिकं जायमानम् आसीत्। एकस्मिन् अपराह्णे तु मुसलधारावृष्टिः। भयङ्कर्यः सौदामन्यः, स्तनितानि च। गावः 'अम्ब.. अम्ब..' इति क्रन्दन्त्यः धावित्वा गोष्ठं प्राप्तवत्यः। वृद्धाः गोविन्दभगवत्पादाः गुहायां सन्ति। नदीप्रवाहस्य गर्जनम् अन्तः न श्रूयते स्म। रात्रौ जायमानायां सत्यां गुरवः शयितवन्तः। शङ्करः, इतरशिष्याश्च पार्श्वस्थे मन्दिरे सन्ति। 'नदीजलम् उपरि आगच्छत् अस्ति। गुहायां जलप्रवाहः असम्भवस्तु न। किं करणीयम्?' इति तेषु चर्चा प्रचलति। स्वल्पसमयानन्तरं प्रायः पञ्चविंशतिवयोयुतैः त्रिभिः सहपाठिभिः साकं शङ्करः नदीं दृष्ट्वा आगन्तुं प्रस्थितः। सायङ्कालस्य अवसानकालः। घनमेघानां कारणेन महान् अन्धकारः जातः अस्ति । तस्मिन् तटे अवतरति सत्येव जलं तृतीयसोपानं घट्टते स्म। प्रवाहः उपरि आयाति इति स्पष्टम् अभवत्। शङ्करः तैः त्रिभिः सह मन्दिरं धावितवान्। सम्भ्रान्त्या परितः स्थितान् सर्वान् शिष्यान् उद्दिश्य अवदत्; 'प्रवाहः तीव्रतया उपरि आगच्छन् अस्ति। प्रायः वयं सर्वे निद्रां कर्तुं न शक्नुमः। सर्वे जागरूकाः भवन्तु। अपायः सम्भवतीति भासते चेत् अहं भवतः सूचयिष्यामि। भवद्भिः गुरून् उत्थाप्य तेषां मन्दिरस्य वितर्द्यां शयनस्य



व्यवस्था करणीया भवति। केचन मन्दिरे तिष्ठन्तु। भवन्तः त्रयः अपि गुहायाः बहिः भित्तेः समीपे तिष्ठन्तु।' तेन इत्थं कथिते सत्येव सर्वे स्वेषां जानुनोः उपरि वेष्टिं बद्धवन्तः। शङ्करः अपि तद्वदेव बद्ध्वा दण्डं कमण्डलुं च स्वीकृत्य 'भवन्तः केऽपि नदीं प्रति मा आगच्छन्तु, भवतां स्थानेषु एव भवद्भिः जागरूकैः भाव्यम्' इत्युक्त्वा नदीं प्रति प्रस्थितवान्।

रात्रौ एकादशवादनम् अतीतम्। वृष्टिः जायमाना अस्ति। गाढान्धकारः। तदा तदा विद्योतमानायाः सौदामन्याः प्रकाशे शङ्करः अभ्यासबलेन गत्वा अपश्यत्। पूर्वस्याः पश्चिमां दिशं प्रति प्रवहज्जलं द्वितीयसोपानस्य उपरि प्रवहत् अस्ति। विस्तृते तस्मिन् सोपाने एव पूर्वाभिमुखं पद्मासने उपविश्य कमण्डलुं स्वस्य पुरतः एव स्थापितवान्। नेत्रे निमील्य पूरकेण 'ओं भूः ओं भुवः ओं सुवः ओं महः ओं जनः ओं तपः, ओं सत्यम् ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्, ओमापो ज्योतिरसो अमृतं ब्रह्म भूर्भुवस्सुवरोम्' इति वदन् कुम्भकम् अकरोत्। सहस्रारात् आरभ्य एकैकस्मिन् चक्रे व्यष्टिसमष्टिदेवताः स्मरन् मूलाधारं प्रति आगत्य रेचकम् अकरोत्। पुनः पूरकं कृत्वा लयक्रमेण मूलाधारात् स्वाधिष्ठानं प्रति आगत्य, बुद्धिम् आदौ काकिन्यां संस्थाप्य, अनन्तरं कुम्भकं कृत्वा वरुणे स्थिरीकृत्य समाधिस्थः अभवत्। तावदेव ।

* * * * * * *

उषःकाले वृष्टिः न्यूना जायमाना आसीत्। गुरवः उत्थिताः इति शब्दं श्रुत्वा बहिस्थाः शिष्याः अन्तः अगच्छन्। 'वृष्टिः स्थगिता वा?' इति अपृच्छन् गुरवः।

'सम्पूर्णतया न स्थगिता। न्यूना जायमाना अस्ति।'

'शङ्करम् आह्वय।'

'सः नदीं प्रति गतवान् अस्ति। मध्येरात्रम् एव तत्र केऽपि मा आगच्छन्तु, अत्रैव स्थित्वा गुरूणां विषये अवधानं प्रयच्छन्तु' इत्युक्त्वा कमण्डलुं दण्डं च गृहीत्वा नदीतटं प्रति अगच्छत्। रात्रौ मुसलधारावृष्टिः आसीत्।'

इदं शृण्वन्तः एव गुरवः व्याकुलतया शिष्यैः सह नदीं प्रस्थितवन्तः। तत्र परमाश्चर्यम् अनुभूतवन्तः। शङ्करः समाधौ अस्ति। तस्य पुरस्तात् कमण्डलुः अस्ति। ततः अग्रे प्रवाहः भीकरः अस्ति; ततः पृष्ठतः तु शान्तः अस्ति! रहस्यं किं स्यात् इति मन्दप्रकाशे समीपं गत्वा दृष्टे सति, कमण्डलुः अगस्त्यस्य मुखमिव

प्रवाहं गिलन् अस्ति। कौशिकस्य सकलास्त्राणि ब्रह्मास्त्रं च गीर्णवान् वसिष्ठस्य ब्रह्मदण्डः इव शङ्करस्य कमण्डलुः प्रवाहं गिलति। शान्ता नदी शङ्करस्य नाभिस्तरे प्रवहन्ती अस्ति। शङ्करस्य बाह्यप्रज्ञा नास्ति। गुरवः तं न उत्थापितवन्तः। स्नात्वा नर्मदादेवीं नमस्कृतवन्तः। 'न कोऽपि तम् उत्थापयतु। भवन्तः अत्रैव तिष्ठन्तः कोऽपि तस्य निकटं यथा न गच्छेत् तथा जागरूकाः भवन्तु। सूर्योदये सः उत्तिष्ठति' इत्युक्त्वा प्रस्थितवन्तः। अन्ये शिष्याः गुरून् अनुसृतवन्तः। शिष्यैः शङ्करः महासिद्धपुरुषः इति स्पष्टं ज्ञातम्। गुरुषु विद्यमाना भक्तिः एव तस्मिन् अपि जागरिता। अनन्तरं तम् अतिपरिचयेन एकवचनेन सम्बोधयितुं ते भयम् अनुभूतवन्तः। बहुवचनं शरणं गताः; 'त्वम्' अधुना 'भवान्' इत्यभवत्। गुरूणां तु अपरिमितः सन्तोषः। अध्यापिता विद्या सिद्धा इति सन्तृप्तिः। लोकोद्धारार्थम् अवतीर्णः अयम् इति स्पष्टमभवत्।

कतिपयदिनानामनन्तरम् एका रात्रिः। गुरूणां शयनव्यवस्थां कृत्वा, नमस्कृत्य, अनन्तरं स्वयमपि गत्वा शयनं शिष्याणां रूढिः। तस्मिन् दिवसे अपि तथैव। अन्ते शङ्करः शयनार्थं गन्तुं सज्जः सन् नमस्कृतवान्। गुरवः 'निद्रा बाधते वा? अथवा उपवेष्टुं शक्नोति किम्?' इति अपृच्छन्।

'न बाधते, उपविशामि।'

'शास्त्रपाठनं समाप्तम्। इतःपरं न किमपि अवशिष्टं, शास्त्रविचारं कर्तुं न उपवेशयामि। किन्तु नैकेषां विचाराणां सम्बद्धतया भाषणस्य समयः अधुना आगतः अस्ति। गुर्जरदेशात् व्यासपूजार्थं यात्रार्थिनः आगताः आसन्। तैः उक्तैः विचारैः अहं बहुधा व्याकुलः अस्मि। ते विचाराः भाविनः कालस्य विपत्कारकघटनानां पूर्वसूचनारूपाः सन्ति। इतः दक्षिणस्यां दिशि स्थाणकम् इत्येकं नगरमस्ति।[1] तत् नगरं १५०वर्षेभ्यः पूर्वं नौकाभिः आगतैः अरबजनैः आक्रान्तम्। तदा बादामि-चालुक्यानां द्वितीयपुलिकेशेः साम्राज्यं कावेरीतः नर्मदापर्यन्तम् आसीत्। सः दक्षिणगुर्जरदेशस्य नवसारिकापत्तने माण्डलिकरूपेण अवनिजाशयपुलिकेशिः इति कस्यचन नियोजनं कृतवान् आसीत्। सः बहुसाहसेन अरबजनान् प्रतिसारितवान्। इदमिदानीं मम बाल्यदिनेषु मीरखासींनामकः अरबजनः सिन्धुदेशम् आक्रान्तवान्। महाराजस्य हर्षस्य पोषणेन प्रवृद्धा बौद्धानां सङ्ख्या तत्र महती आसीत्। ते मीरखासीमस्य साहाय्यम् अकुर्वन्। राजा दाहिरः युद्धे मृतः। ५०वर्षाणि यावत्, जनानाम् उपरि अरब्बानाम् अमानुषः हिंसाचारः प्रवृत्तः। अनन्तरं प्रवृत्तेषु युद्धेषु तेषां पलायनम्

१. मुम्बयीसमीपस्थं ठाणा।



आपन्नम्। देशस्य पश्चिमभागे धर्मस्य अवनतिः तीव्रा अस्ति। एतस्य सर्वस्यापि मूलं बौद्धाः। तेषां प्राबल्यम् अधुना बहुन्यूनं चेदपि इतोऽपि अवशिष्टम् अस्ति।'

'सैन्यबलेन राजानः आक्रमणं कृत्वा देशान् स्वाधीनान् कुर्वन्ति। किन्तु बुद्धेन नैकेषां जनानां स्वाधीनकरणं कथं साध्यमभवत्?' इत्यपृच्छत् शङ्करः।

'कथमिति पश्यतु। धर्मे आस्था मनुष्याणां स्वभावः। अतः एव अपौरुषेयः सनातनवैदिकधर्मः जनेषु दृढतया स्थितः विद्यते। तदा विभिन्नस्वभावयुताः जनाः अपि परस्परं विश्वासेन शान्त्या च जीवन्ति; यतो हि वैदिकधर्मेण सह सर्वाण्यपि अभिमतानि सङ्गच्छन्ते। वैदिकधर्मस्य प्रभावे ह्रासतां गते सति स्वेषां बुद्धिशक्त्या एव अधिकविश्वासवन्तः केचन स्वेषाम् अनुमानानाम् आधारेण स्वीयान् एव सिद्धान्तान् जनानां पुरस्तात् उपस्थापयन्ति। वैदिकधर्मस्य सम्पर्करहिताः मुग्धाः तेषां वचनैः चकिताः सन्तः प्रभाविताः भवन्ति। ते सिद्धान्ताः एकदेशीयाः इति अजानन्तः अनुयायिनः, अन्येषां सिद्धान्तानां विषये असहनां प्रकटीकुर्वन्ति। चर्चां कर्तुम् अनिच्छवः ते येन केनापि प्रकारेण तान् सिद्धान्तान् प्रसारयितुं प्रयतन्ते। दुष्टपशवः इव जनान् मारयन्तः भाययन्तः मतपरिवर्तनं कर्तुम् अपि न जुगुप्सन्ते। इदं न सम्भवति चेत् वञ्चनया वा स्वीयपक्षे जनानां योजनं तेषां ध्येयं भवति। तदा सर्वत्र क्षोभः सञ्जायते। अधुना जातं तदेव। किन्तु सनातनवैदिकधर्मे तथा न। सः अपौरुषेयः। सर्वाण्यपि अभिमतानि तेन सह सङ्गच्छन्ते इत्यतः क्षोभस्य अवसरः नास्ति। अथापि केऽपि क्षोभं जनयन्ति चेदपि तेषां दमनस्य व्यवस्था अपि वैदिकधर्मे अस्ति।

अतः अस्याः वैदिकपरम्परायाः समग्रदृष्टिं मनसि निधाय परिस्थितेः प्रगत्यै प्रयत्नः अपेक्ष्यते। राक्षसीप्रवृत्तिमन्तः सर्वदापि भवन्त्येव इत्यतः इदं कार्यं सर्वदापि भवेदेव। अस्मिन् प्रमुखं पात्रं ब्राह्मणानां क्षत्रियाणां च। राज्ञां धैर्यं, पराक्रमः, शत्रुमित्रबलाबलविवेचनसामर्थ्यं, तदनुसारं स्वीकर्तव्यस्य क्रमस्य निश्चायिका सूक्ष्मबुद्धिः, दूरदर्शित्वं च भवेत्। ब्राह्मणस्य त्यागः, तपः, विद्या, जनेषु मैत्रीभावः च भवेत्। जनानां योगक्षेमविषये उभयोः अपि आस्था भवेत्। चन्द्रगुप्तविक्रमादित्य-सदृशानां राज्ञां द्वारा क्षात्रतेजसा इतःपूर्वम् इदं कार्यं निरूढम्। तत् अधुना शिथिलं जातमस्ति। तत् दृढं करणीयम्। कुमारिलभट्टसदृशाः ब्राह्मणाः अपि स्वेषां दायित्वं निर्वहन्तः सन्ति। एतेषां प्रयत्नाः स्तुत्यर्हाः। किन्तु इदम् इतोऽपि व्यापकतया भवेत्। धर्मस्य समग्रदृष्टिं मनसि निधाय चतुर्वर्णानां सामान्यजनेषु धर्मजागृतिः करणीया।

Mahaparivrajaka